# केरलपाठावलिः

# संस्कृतम्

## अष्टमी कक्ष्या

अक्कादमिक-संस्कृतविद्यालयानां कृते

## KERALA READER SANSKRIT

STANDARD

8

For Academic and Sanskrit Schools

Government of Kerala
Department of Education

# राष्ट्रगीतम्

जनगण मन अधिनायक जय हे,
भारत भाग्यविधाता।
पंजाब सिंध गुजरात मराठा,
द्राविड उत्कल बंगा,
विंध्य हिमाचल यमुना गंगा,
उच्छलजलधि तरंगा।
तव शुभ नामे जागे,
तव शुभ आशिष माँगे,
गाहे तव- जय गाथा।
जनगण मंगलदायक जय हे,
भारत भाग्यविधाता।
जय हे जय हे जय हे
जय जय जय जय हे

# प्रतिज्ञा

भारतं मम राष्ट्रम्। सर्वे भारतीयाः मे भ्रातरः। अहं मम राष्ट्रे स्निह्यामि। तस्य समृद्धायां नानाविधायां च पूर्विकसम्पत्तौ अभिमानी च भवामि। तद्योग्यतां सम्पादयितुं सदा यतिष्ये च।

अहं पितरौ गुरूंश्चादरिष्ये, बहुमानयिष्ये च। विनयान्वित एवाहं सदा सर्वैः सह व्यवहरिष्ये, सर्वेषु प्राणिषु दयालुर्वर्तिष्ये च।

मम राष्ट्राय राष्ट्रियेभ्यश्चाहं समर्पये स्वसेवाम्। राष्ट्रियाणां योगक्षेमैश्वर्येष्वेवाहम् आत्मनस्तोषं कलयामि।

State Council of Educational Research and Training (SCERT)
Poojappura, Thiruvananthapuram 695012, Kerala
Website: www.scertkerala.gov.in
email: scertkerala@gmail.com
Phone:0471-2341883, fax;0471-231869
First Edition: 2015, Reprint: 2016
Typesetting and Layout: SCERT
Printed at : KBPS, Kakkanad, Kochi-30
Department of Education, Government of Kerala

# भूमिका

प्रियच्छात्र!

प्रवर्तनाधिष्ठिता छात्रकेन्द्रीकृता च भवति अस्माकं पाठ्यपद्धतिः। तदनुसृत्य छात्राणां सर्वतोमुखविकासं लक्ष्यीकृत्य पाठ्यक्रमः स्वीकृतः अस्ति। पाठ्यक्रमे अद्वितीयं भवति पाठपुस्तकम्। भाषापराणां नैपुणीनां विकासाय स्वयं पठनाय च पाठपुस्तकं उपकरोति।

विविधव्यवहाररूपाणां परिचायनाय पुस्तकेऽस्मिन् पठनसन्दर्भाः आयोजिताः वर्तन्ते। पठितानाम् आशयानां प्रबलीकरणाय नूतनसन्दर्भेषु प्रयोगाय स्वयंमूल्यनिर्णयाय च अवसराः यथायोग्यं दत्ताः।

भाषापठनम् अनायासं सुखप्रदं च कर्तुं पाठपुस्तकमिदं प्रयोजकमिति चिन्तयामि। वर्णमनोहराणि चित्राणि छात्रमनांसि आकर्षन्ति नूनम्। संस्कृतपठनं सर्वथा मधुरं सफलं च भवतु इति आशासे।

**डा॰ पी.ए फत्तिमा**

निदेशकः

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलाः

## TEXT BOOK DEVELOPMENT COMMITTEE
## SANSKRIT STANDARD VIII

### Participants

1. **Anitha.S,** H.S.A,(Skt.) G.G.H.S.S Cotton Hill ,Thiruvananthapuram.
2. **Hariprasad. V.T**, H.S.A, (Skt.) G.H.S.S, Thiruvangad, Thalassery,Kannur.
3. **Jose.S**, H.S.A (Skt.), H.S.S Mezhathur, Palakkad.
4. **Malathi .P,** H.S.A, (Skt.) G.H.S.S, Edappal, Malappuram.
5. **Manoj.K.V**, H.S.A, (Skt.) Koodali H.S.S, Kannur.
6. **Rema Bai .K.G**, H.S.A (Rtd) Priyalaya, Kannapuram, Cherukunnu, Kannur.
7. **Shaija E.R,** H.S.A (Skt.), St Joseph's H.S. Chathedom, Ernakulam.
8. **Surendran Kadaikodu,** H.S.A, (Rtd.) Arunima, Kadaikodu, Kollam.
9. **Viswaja .P.Nair,** H.S.A, (Skt.) G.G H.S.S Ernakulam.
10. **Padmanabhan .P,** H.S.A (Skt.), G.H.S.S Chalissery, Palakkad.

### Artists

1. **Balakrishnan Achary. P.G**, Lecterur(Rtd), DIET.
2. **Rajeevan Parayil,** Azhikkode .H.S, Kannur.
3. **Varghese Kalathil,** G.H.S.S Pallikkunnu, Kannur.

### Experts

1. **Dr.T.D Suneethi Devi,** Special Officer (Sanskrit) DPI, Thiruvananthapuram.
2. **N.K Ramachandarn,** District Educational Officer (Rtd.), Wayanad.
3. **V.Vijayan,** Senior Lecturer DIET (Rtd.) Krishna Kripa, Maruthur, Pattambi, Palakkad.

### Advisor

1. **Dr. R. Vasudevan Potti,** Professor (Rtd.), Govt. Sanskrit College, Thiruvananthapuram

### Academic Co ordinator

**Dr. Shameeja.P**
Research Officer (Sanskrit) SCERT

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलाः
**State Council of Educational Research and Training Centre**
**Poojapura, TVM**

# विषयानुक्रमणिका


| क्रमसंख्या | पाठस्य नाम | व्यवहाररूपम् | पुटसंख्या। |
|---|---|---|---|
| | **एककम्-१-स्वस्थवृत्तम्।** | | |
| १. | विभातम् | (बालकविता) | ८ |
| २. | कोऽरुक् | (कथा) | १२ |
| ३. | सुखदो व्यायामः | (विवरणम्) | १७ |
| ४. | कृषिः सर्वार्थसाधिका | (सम्भाषणम्) | २२ |
| | **एककम्-२ पुरावृत्तम्।** | | |
| ५. | गीतासुधामाधुरी | (भगवद्गीता) | ३२ |
| ६. | त्वमेव जननी भव | (नाटकम्) | ३७ |
| ७. | सम्बन्धमाभाषणपूर्वकम् | (काव्यम्) | ४५ |
| | **एककम्-३ न्यायवृत्तम्।** | | |
| ८. | लौकिकन्यायाः | (विवरणम्) | ६६ |
| ९. | सर्गवैचित्र्यम् | (कथा) | ७० |
| | **एककम्-४ शीलवृत्तम्।** | | |
| १०. | प्रकृतिसिद्धमिदं हि महात्मनाम् | (सुभाषितानि) | ७६ |
| ११. | केरलकालिदासः | (जीवनचरितम्) | ८२ |

# एककम्-१

# स्वस्थवृत्तम्।

## आमुखम्

स्वस्थे शरीरे एव स्वस्थं मनः। अतः शरीरस्य तथा मनसः च स्वास्थ्यमस्माभिः सम्पादनीयम्।

आरोग्यपरिपालने दिनचर्या कथमुपकारिका भवति? अधुना शाकादीनि स्वास्थ्यविनाशकानि भवन्ति किम्? केवलमाहारेणैव स्वास्थ्यं लभते वा?

केरलीयस्वास्थ्यपारम्पर्यमवगन्तुं एककमिदम् उपकारकं स्यात्- पठतु।





## पठनाधिगमाः

* आशयं ज्ञात्वा अन्वयं लिखति।
* सूचनानुसारं कविताभागं पूरयति।
* समानाशययुक्ताः कविताः समाहरति ।
* कथां सस्वरं भावानुसारं च वाचयति।
* आशयानुसारं कथांशान् क्रमीकृत्य कथां रचयति।
* कथां कथयति।
* कथाः सञ्चिनोति।
* आशयानुसारम् उपन्यासं लिखति।
* प्रश्नावलीं निर्माति।
* योगासनानां चित्राणि सञ्चिनोति।
* स्वाभाविकसन्दर्भेषु सयुक्तिकं सम्भाषणं करोति।
* कथापात्राणां भागं स्वीकृत्य आशयव्यक्ततया सम्भाषणमवतारयति।
* कर्तरिकर्मणिप्रयोगौ विविच्य लिखति।
* जैवकृषिमधिकृत्य ह्रस्वोपन्यासं लिखति अवतारयति।



## प्रथमः पाठः

# विभातम्

मन्दं मन्दं गच्छति रजनी
तारागणसहिता।
अभ्यागच्छति सूर्यस्तापित-
कनकारुणकिरणः।।

निद्रां त्यक्त्वा स्वकीयतल्पात्
समुत्थितोऽस्म्यत्र।
करोमि पादस्मरणं प्रथमं
जगतामीशस्य।।

मातापितरौ मनसा नत्वा
बहिरागच्छामि।
प्रभातसन्ध्यासुन्दरदृश्यं
नितरां पश्यामि।।



पिबन्ति मधुरं मधुपाः समुदं
सुमात्सुमं गत्वा।
कलाविकः सन्तुष्ट्या गायति
प्रभातभूपालम्।।

विभातपुष्पसुगन्धसमेतो
वाति च मृदुपवनः।
प्रशान्तशीतलसमयोऽद्यात्र
ददाति मे सौख्यम्।।

**पदच्छेदः**

| | | |
|---|---|---|
| सूर्यस्तापितकनकारुणकिरणः | - | सूर्यः +तापितकनकारुणकिरणः। |
| समुत्थितोऽस्म्यत्र | - | समुत्थितः + अस्मि + अत्र। |
| जगतामीशस्य | - | जगताम् + ईशस्य। |
| बहिरागच्छामि | - | बहिः + आगच्छामि। |
| सुमात्सुमम् | - | सुमात् + सुमम्। |
| प्रशान्तशीतलसमयोऽद्यात्र | - | प्रशान्तशीतलसमयः +अद्य +अत्र। |

**विग्रहवाक्यानि**

| | | |
|---|---|---|
| तारागणसहिता | - | तारागणैः सहिता। |
| तापितकनकारुणकिरणः | - | तापितं च तत् कनकं च तापितकनकम्, तदिव अरुणः तापितकनकारुणः, तादृशैः किरणैः सहितः यः सः । |
| मातापितरौ | - | माता च पिता च। |
| प्रभातसन्ध्यासुन्दरदृश्यम् | - | प्रभातसन्ध्यायाः सुन्दरं यत् दृश्यं तत्। |
| विभातपुष्पसुगन्धसमेतः | - | विभाते पुष्पं विभातपुष्पं तस्य सुगन्धः, विभातपुष्पसुगन्धः, तेन समेतः। |
| प्रशान्तशीतलसमयः | - | प्रशान्तः शीतलश्च प्रशान्तशीतलः प्रशान्तशीतलः समयः। |

# पठनप्रवर्तनानि



**तालानुसारं बालकविताम् आलपतु।**

*श्रद्धेयौ अंशौ-* उचितः तालः।

अक्षरस्फुटता।



**समानाशययुक्तानि कविताशकलानि सञ्चिनोतु।**

*श्रद्धेयौ अंशौ-* समाहरणपटुता।

अवतारणसामर्थ्यम्।



**कवितां पठित्वा क्रियापदानि सञ्चिनोतु। तान्युपयुज्य नूतनवाक्यानि रचयतु।**

*श्रद्धेयौ अंशौ* - वाक्यरचनासामर्थ्यम्।

क्रियापदचयनम्।



**कवितायाःआशयं स्ववाक्यैः लिखतु।**

*श्रद्धेयौ अंशौ-* आशयपूर्णता।

वाक्यघटना।



**अधोनिर्दिष्टेषु विषयेषु इष्टतममधिकृत्य कवितां रचयतु।**

आकाशनीलिमा, मातृस्नेहः, काननश्रीः, चन्द्रोदयः

*श्रद्धेयाः अंशाः-* आशयपूर्णता।

विषयावबोधः।

वर्णनाचातुरी।



द्वितीयः पाठः

# कोऽरुक्

आयुर्वेदचिकित्सामण्डले प्रसिद्धेषु केरलीयेषु अन्यतमः आसीत् आलत्तियूर् नम्पी। सः प्रतिदिनं कुलदेवतामन्दिरं गच्छति स्म। मध्येमार्गं सः 'कोऽरुक्' 'कोऽरुक्' इति रटन्तौ

खगौ अपश्यत्। तयोः शब्दैः आकृष्टः विशेषज्ञो वैद्यः तत्र कः अरुक् इति प्रश्नः निलीयमानः इति अचिन्तयत्। स एवं प्रत्यवदत्-

काले हितमितभोजी कृतचंक्रमणः क्रमेण वामशायी।
अविरुद्धमूत्रपुरीषः स्त्रीषु यतात्मा च यो नरः सोऽरुक्।। इति।

वैद्यस्य प्रतिवचनेन तृप्तौ तौ खगौ तदैव अप्रत्यक्षौ अभवताम्। दिनद्वयानन्तरं द्वौ बालौ वैद्यस्य समीपम् आयुर्वेदपठनार्थमागच्छताम्। तौ शिष्यत्वेन स्वीकृत्य वैद्यः पाठनमारभत। तौ अतीव समर्थावपि विविधैः चापल्यैः गुरुं क्लेशितवन्तौ।

एकस्मिन् दिने कश्चन ग्रामीणः असह्यमानशिरोवेदनया वैद्यस्य गृहं प्राप्तवान्। तस्मिन्नवसरे वैद्यः तत्र नासीत्। तौ शिष्यौ ग्रामीणं तं प्रकोष्ठमानीय रोगहेतुं विज्ञाय मस्तके औषधलेपनम् अकुरुताम्। तदनन्तरं तस्य कपालमुद्घाट्य मस्तकस्थान् कीटान् निर्माज्य पूर्ववत् स्थापितवन्तौ। वैद्यस्य पुत्रस्तु निलीय एतत्सर्वं पश्यति स्म।

यदा वैद्यः प्रत्यागतः तदा वैद्यपुत्रः सर्वमपि वृत्तान्तं पित्रे न्यवेदयत्। पुत्रवचनात् गुरुः समस्तं रहस्यं ज्ञातवान् इति मत्वा ततः गन्तुमुद्युक्तौ तौ शिष्यौ गुरुं समेत्य अवदताम्

"भो महाशय! आवां गन्तुमिच्छावः" इति।

"भवन्तौ कौ? किमर्थमत्र आगतवन्तौ? सत्यं वदताम्" इति वैद्यस्य वचनं श्रुत्वा तौ पुनरप्यवदताम्।


"आवाम् आयुर्वेदस्य प्रचारणार्थं भूमौ आगतवन्तौ देववैद्यौ। आवाम् एव पुरा पक्षिरूपेण भवन्तं परीक्षितवन्तौ" इति।

अनन्तरं गुरुदक्षिणारूपेण अमूल्यमेकं ग्रन्थं वैद्याय समर्पयताम्। तयोः अश्विनीदेवयोः अनुग्रहेण कीर्तिं प्राप्तः आलत्तियूर् नम्पी पश्चात् अष्टवैद्यानां मध्ये प्रमुखस्थानम् अवाप।

## पदच्छेदः

| | | |
|---|---|---|
| अन्यतमोऽस्ति | - | अन्यतमः + अस्ति। |
| कोऽरुक् | - | कः + अरुक्। |
| यो नरः | - | यः + नरः। |
| गताविव | - | गतौ + इव। |
| पठनमारभत | - | पठनम् + आरभत। |
| समर्थावपि | - | समर्थौ + अपि। |
| तस्मिन्नवसरे | - | तस्मिन् + अवसरे। |
| नासीत् | - | न + आसीत्। |
| पुत्रस्तु | - | पुत्रः + तु। |
| सर्वमपि | - | सर्वम् + अपि। |
| पुनरप्यवदताम् | - | पुनः + अपि + अवदताम्। |
| गन्तुमिच्छावः | - | गन्तुम् + इच्छावः। |

# पठनप्रवर्तनानि



**कथां कक्ष्यायाम् अवतारयतु।**

*श्रद्धेयाः अंशाः-* कथाकथनशैली।

आशयस्य संग्रहणम्।

आशयव्यक्तता।



**पाठभागं पठित्वा कथामिमां स्ववाक्यैः लिखतु।**

*श्रद्धेयाः अंशाः-* उचितः भाषाप्रयोगः।

आशयपूर्णता।

आशयव्यक्तता।



**वैद्यभवनात् गन्तुमिच्छतोः बालकयोः वैद्यस्य च भाषणं सम्भाव्य लिखतु-**

*श्रद्धेयाः अंशाः-* सन्दर्भानुसारं सम्भाषणम्।

उचिता वाक्यघटना।

आशयक्रमीकरणम्।



**कथास्तम्भं क्रमीकरोतु-**

तौ शिष्यत्वेन स्वीकृत्य वैद्यः पाठनमारभत।

कोऽरुक् इति रटन्तौ खगौ अपश्यत्।

वैद्यपुत्रः सर्वमपि वृत्तान्तं पित्रे न्यवेदयत्।

मस्तके औषधलेपनम् अकुरुताम्।

आलत्तियूर् नम्पि अष्टवैद्यानां मध्ये प्रमुखं स्थानम् अवाप।

आलत्तियूर् नम्पि प्रतिदिनं कुलदेवतामन्दिरं गच्छति स्म।

कश्चन ग्रामीणः शिरोवेदनया वैद्यस्य गृहं प्राप्तवान्।



**आधुनिककाले कः आरोग्यवान् इति विषये चर्चां कृत्वा लघुटिप्पणीं लिखतु ?**

*श्रद्धेयाः अंशाः-* आशयावबोधः

विवेचनसामर्थ्यम्।

क्रमीकरणम्।



**पाठभागं पठित्वा अव्ययपदानि चित्वा पट्टिकां पूरयतु।**

| क्त्वान्तानि | ल्यबन्तानि | तुमुन्नन्तानि | अन्यानि। |
|---|---|---|---|
| | | | |

*श्रद्धेयौ अंशौ-* उचितपदचयनम्

उचितकोष्ठके निवेशनम्।



**कथाः समाहरतु कक्ष्यायाम् अवतारयतु। सम्पुटम् आरचयतु।**

*श्रद्धेयौ अंशौ-* समयक्रमः।

अवतारणपटुता।



**भारते इदानीं प्रचाल्यमानाः चिकित्साविधयः के इति लिखतु।**

## तृतीयः पाठः

# सुखदो व्यायामः



भारतीयदर्शनेषु अतिविशिष्टं भवति योगदर्शनम्। षड्दर्शनेषु अन्यतमस्यास्य प्रणेता भवति पतञ्जलिमहर्षिः। तेन रचितः ग्रन्थः भवति योगसूत्रम्। तस्मिन् चत्वारोऽध्यायाः, सन्ति। तत्र षण्णवत्युत्तरशतम् (१९६) सूत्राणि विद्यन्ते।

योगशास्त्रे यम-नियम-आसन-प्राणायाम- प्रत्याहार-धारणा-ध्यान-समाधिरूपाणि अष्टाङ्गानि कल्पितानि।

अहिंसा सत्यम् अस्तेयं ब्रह्मचर्या अपरिग्रहः एते यमाः। शौचसन्तोषतपःस्वाध्यायप्रणिधानानि नियमाः। यमादयश्चत्वाराः बहिरङ्गयोगाः अथवा हठयोगाः। प्रत्याहारादि अन्तिमचतुष्टयम् अन्तरङ्गयोगाः, अथवा राजयोगाः इति च प्रसिद्धाः।

पातञ्जलयोगसूत्रे स्थिरसुखमासनम् इत्यस्ति आसनस्य निर्वचनम्। हठयोगप्रदीपिका, घेरण्डसंहिता इत्यादिषु ग्रन्थेषु विविधानि योगासनानि विस्तरेण प्रतिपादितानि सन्ति।

आसनानि चतुर्विधानि। ध्यानासनानि, व्यायामासनानि, विश्रमासनानि, मनःकायिकासनानि च। पद्मासनं, वज्रासनं, सिद्धासनं, सुखासनम् इत्येतानि ध्यानासनानि भवन्ति। शलभासनं, पादहस्तासनं, धनुरासनम् इत्यादीनि व्यायामासनानि। शवासनं, मकरासनम् इत्यादीनि विश्रमासनानि। प्राणायामः, ध्यानं, सूर्यनमस्कारः इत्यादीनि मनःकायिकासनानि।

तेषु कानिचन आसनानि पश्यामः। एतानि आसनानि आचार्यस्य निर्देशानुसारमेव करणीयानि।

## वज्रासनम्



अस्य आसनस्य अनुष्ठानेन पेशीवेदना, जानुपीडा च शाम्यति।अम्लोद्गरवायुकोपयोः शान्तिं लभते। नीर्वातः, श्रोणीवेदना, प्रमेहरोगः इत्येतेभ्यः मुक्तिं लभते च।

## धनुरासनम्

कशेरुकाणां दृढतां वर्धयति। उदरपेशीनां बलं वर्धते। वक्षस्कन्धयोः सन्धीनां




बलम् उन्मेषं च लभते। उदरस्य दुर्मेदः नश्यति। वातरोगात् मुक्तिं लभते। वायुदोषान् मलावरोधं च नाशयति।

## पद्मासनम्



अत्युत्कृष्टम् आसनं भवति पद्मासनम्। अस्यासनस्य अनुष्ठानेन एकाग्रता वर्धते। मनः शरीरः च दृढं भवति। इदमासनम् आलस्यं क्लमं च निवारयति। शरीरस्य बाह्याभ्यन्तरावयवानाम् उत्तेजनं क्रियते। मनसः शान्तिः भवति।

## शवासनम्



मानसिकक्लेशानां परिहाराय प्रयोजकं भवति इदमासनम्। शरीरस्य क्लमम् अपनयति। मनोबलं वर्धयति। एकाग्रता - वर्धनाय च प्रयोजकं भवति। सर्वेषामासनानाम् अन्ते शवासनम् अनुष्ठीयते।

## पदच्छेदः

| | | |
|---|---|---|
| चत्वारोऽध्यायाः | - | चत्वारः +अध्यायाः। |
| अस्यासनस्य | - | अस्य+आसनस्य। |
| यमादयश्चत्वारः | - | यमादयः +चत्वारः। |

## विग्रहः

| | | |
|---|---|---|
| अतिविशिष्टम् | - | अतिशयेन विशिष्टम्। |
| प्रत्यध्यायम् | - | अध्याये अध्याये। |
| यमादयः | - | यमः आदौ येषां ते । |

## पठनप्रवर्तनानि



**पाठभागं सम्यक् पठित्वा प्रश्नोत्तरकेलिं चालयतु।**

*श्रद्धेयौ अंशौ-* प्रश्नवाचकशब्दानां समीचीनः उपयोगः।

उचितम् उत्तरम्।



**योगाचार्येण सह संभाषणं कृत्वा व्यायामस्य प्राधान्यमधिकृत्य टिप्पणीं लिखतु।**

*श्रद्धेयाः अंशाः-* प्रश्नावली निर्माणसामर्थ्यम्।

वाक्यघटना।

आशयपूर्णता।

**योगासनस्य प्रयोजनान्यधिकृत्य मुद्रागीतं लिखतु। विद्यालये प्रदर्शयतु।**

श्रद्धेयाः अंशाः-

संक्षिप्तता।

आशयव्यक्तता।

तालबोधः।

**आरोग्यसंरक्षणे आसनानां प्राधान्यम् अधिकृत्य प्रभाषणं लिखतु, अवतारयतु।**

श्रद्धेयौ *अंशौ*-

उपन्यासस्य घटना।

आशयव्यक्तता।

**सकारान्तः नपुंसकलिङ्गः मनस् शब्दः**

| | ए.व | द्वि.व | ब.व |
|---|---|---|---|
| **प्रथमा** | मनः | मनसी | मनांसि |
| **सं.प्र** | हे मनः | हे मनसी | हे मनांसि |
| **द्वि.** | मनः | मनसी | मनांसि |
| **तृ.** | मनसा | मनोभ्यां | मनोभिः |
| **च.** | मनसे | मनोभ्यां | मनोभ्यः |
| **प.** | मनसः | मनोभ्यां | मनोभ्यः |
| **ष.** | मनसः | मनसोः | मनसाम् |
| **स.** | मनसि | मनसोः | मनस्सु। |

चतुर्थः पाठः

# कृषिः सर्वार्थसाधिका



कुसुमपुरं सर्वकारीयविद्यालयस्य कार्षिकपरिषदा कार्षिकपुरस्कारः प्राप्तः। तामभिनन्दितुं कृषिरीतिं ज्ञातुं च समीपस्थात् विद्यालयात् छात्राः अध्यापकैः साकमागच्छन्ति। तत्रस्थं कृषिक्षेत्रं विलोक्य ते कार्यदर्शिनं पृच्छन्ति।

आगतेषु रजीषः - युष्माकं कृषिक्षेत्रं सम्पुष्टम् इति श्रूयते। अत्र कानि कानि रोपितानि?

कार्यदर्शी - भेण्डः, कारवेलः, मरीचम् इत्यादीनि।

साबुः - इतोप्यधिकं किं किम् अस्ति ?

कार्यदर्शी - सर्वमस्ति। श्रूयन्ताम्-

बालकृषका वयं रोपयामः
शाकान्यनेकानि श्रूयतां भोः।
पुष्पशाकं तथा कर्कटी केम्बुकम्
कारवेल्लं कदलीफलञ्च।।
वृन्दाकं दाडिमं वर्तुलकं
रक्तफलानि मरीचं तथा।
गोस्तनी एवमलाबुः पटोलः
कूष्माण्डं भेण्डञ्च सूरणकम्।।
वास्तुकमालुकं मुद्गमेवम्
सर्वं सुलभमिदानीमत्र।



रीना - अहो अतिसुन्दरम्। तत्र मनोहराणि पुष्पाण्यपि दृश्यन्ते। शाकक्षेत्रे तत् किमर्थम् ?

कार्यदर्शी - वयं जैवकृषिरीतिमवलम्ब्यैव शाकादीनि रोपितवन्तः। तत्रस्थान् कीटानपाकर्तुम् अस्माभिः पुष्पसस्यान्यपि पालितानि।

रजीषः - जैवकृषिरीतिः वा ? तत् कथम् ?

कार्यदर्शी - प्रथमं कृषिक्षेत्रं यथाविधि सज्जीक्रियते। कतिपयदिनानन्तरं तत्र बीजानि उप्यन्ते।

राणी - जैवकृषिरीतिं स्वीकर्तुं कारणं किम् ?

कार्यदर्शी - अनया रीत्या भूमेः उर्वरता आर्द्रता च परिपाल्यते।

रीना - कानि कानि ऊर्वरकाणि उपयुक्तानि?

कार्यदर्शी - जैवोर्वरकमेवोपयुक्तम्।

साबु - कुतः एतादृशं ज्ञानं लब्धम्?

कार्यदर्शी - कृषिकार्यालयात् लब्धे पुस्तके एतत् सर्वमस्ति।

आगतेषु अध्यापकः- बीजानि कुतः उपलब्धानि?

कार्यदर्शी - कृषिभवनात्।

आगतः अध्यापकः - अत्र बहुविधानि शाकानि दृश्यन्ते। एतत्सर्वं कथमुपयुज्यते?

कार्यदर्शी - विद्यालयीयभोजनाय उपयुज्यते। शिष्टानि विक्रीयन्ते।

आगतः अध्यापकः - उत्तमम्। भवन्तः महत्कार्यमेव कुर्वन्ति। एतद् अस्माकं प्रचोदकम्। वयमपि एतादृशरीत्या कृषिं कर्तुमिच्छामः।

कार्यदर्शी - समीचीनमेव। धन्यवादः।



कृषिर्मानवजीवातु-
रिति संकथ्यते बुधैः।
सर्वेषां मानवानां तु
कृषिः सर्वार्थसाधिका।।

## पदच्छेदः

| | | |
|---|---|---|
| इतोप्यन्यत् | - | इतः +अपि+ अन्यत्। |
| पुष्पाण्यपि | - | पुष्पाणि +अपि। |
| अवलम्ब्यैव | - | अवलम्ब्य + एव । |
| जैवोर्वरकमेवोपयुज्यते | - | जैवोर्वरकम् +एव+उपयुज्यते। |
| एतदस्माकमपि | - | एतत् +अस्माकम्+अपि। |

## पठनप्रवर्तनानि



**कृषिकार्यालयाधिकारिणा सह संभाषणं कृत्वा लघुटिप्पणीं लिखतु।**

*श्रद्धेयाः अंशाः* प्रश्नावलीनिर्माणसामर्थ्यम्

वाक्यघटना।

आशयपूर्णता।



**जैवकृषिरीतिमधिकृत्य लघुटिप्पणीं लिखतु।**

*श्रद्धेयौ अंशौ-* आशयपूर्णता।

वाक्यघटना।



**अनुबन्धे प्रदत्तां मञ्जूषां पठित्वा शाकानां पुष्पाणां फलानां च पट्टिकां रचयतु।**

*श्रद्धेयौ अंशौ-* पट्टिकाकरणम्।

विवेचनसामर्थ्यम्।

**कृषिः सर्वार्थसाधिका  इति शीर्षकस्य औचित्यमधिकृत्य चर्चां कृत्वा टिप्पणीं लिखतु।**

*श्रद्धेयौ अंशौ-*  औचित्यबोधः।

संक्षिप्तता।

**जैवकृषेः प्रचारार्थं लघुलेखां निर्मातु।**

*श्रद्धेयाः अंशाः-*  शीर्षकम्।

आशयसंग्रहणम्।

आकर्षकत्वम्।

**कर्तरिकर्मणिप्रयोगयुक्तानि वाक्यानि विविच्य लिखतु।**

उदा- *कृषकाः बीजानि स्वीकुर्वन्ति । (कर्तरि)*

*कृषकैः बीजानि स्वीक्रियन्ते। (कर्मणि)*

गोपालेन गौः रक्ष्यते ।

अहं त्वां वन्दे।

गोपालः गां रक्षति।

मया त्वं वन्द्यसे।

*श्रद्धेयौ अंशौ -*  विभक्तिज्ञानम्।

विवेचनसामर्थ्यम्।

# शब्दकोशः

| पदम् | संस्कृतम् | मलयालम् | कन्नटा | आङ्गलम् |
|---|---|---|---|---|
| अरुणम् | रक्तवर्णः | ചുവപ്പ് നിറം | ಕೆಂಪು ಬಣ್ಣ | red colour |
| अरुक् | रोगरहितः | ആരോഗ്യത്തോടു കൂടിയവൻ | ರೋಗರಹಿತನು | healthy person |
| अलाबुः | कूष्माण्डकम् | മത്തങ്ങ | ಚೀನಿಕಾಯಿ | pumpkin |
| अम्लोद्गारः | अम्लोद्गारः | പുളിച്ചുതികട്ടൽ | ಹುಳಿತೇಗು | nausea |
| आर्द्रता | आर्द्रता | നനവ് | ಒದ್ದೆ | wet |
| आलुकम् | आलुकम् | ഉരുളക്കിഴങ്ങ് | ಬಟಾಟೆ | potato |
| उदरः | कुक्षी | വയറ് | ಹೊಟ್ಟೆ | belly |
| उन्मेषः | उन्मेषः | ഉണർവ് | ಕಣ್ಣು ತೆರಯುವುದು | freshness |
| उर्वरकम् | उर्वरकम् | വളം | ಗೊಬ್ಬರ | manure |
| उर्वरता | उर्वरता | വളക്കൂറ് | ಫಲವತ್ತತೆ | fertility |
| कर्कटी | त्रपुसी | കക്കിരി | ಮುಳ್ಳು ಸೌತೆ | cucumber |
| कदलीफलम् | रम्भाफलम् | വാഴപ്പഴം | ಬಾಳೆಹಣ್ಣು | banana |
| कनकम् | स्वर्णम् | സ്വർണ്ണം | ಚಿನ್ನ | gold |
| कपालम् | शिरःकवचम् | തലയോട്ടി | ತಲೆಬುರುಡೆ | skull |
| कलाविकः | ताम्रचूडः | പൂവൻകോഴി | ಹುಂಜ | cock |
| कशेरुका | पृष्टास्थि | നട്ടെല്ല് | ಬೆನ್ನೆಲುಬು | a piece of the backbone |
| क्लमः | सादः | ക്ഷീണം | ಆಯಾಸ | fatigue |
| कार्षिकपरिषद् | कार्षिकसमितिः | കാർഷികസമിതി | ಕೃಷಿಪರಿಷತ್ತು | agricultural committee |

| | | | | |
|---|---|---|---|---|
| कारवेलम् | कठिल्लेकः | കയ്പക്ക | ಹಾಗಲಕಾಯಿ | bittergourd |
| किरणः | मयूखः | രശ്മി | ಕಿರಣ | ray |
| कीटः | क्षुद्रजीवः | ക്ഷുദ്രജീവി | ಕೀಟ | insect |
| केम्बुकम् | हरितम् | കാബേജ് | ಎಲೆಕೋಸು | cabbage |
| गोस्तनी | बिम्बीफलम् | കോവക്ക | ತೊಂಡೆಕಾಯಿ | ivygourd |
| चापल्येन | चपलतया | ചാപല്യത്താൽ | ಚಾಪಲ್ಯದಿಂದ | by mischief |
| जानु | ऊरुपर्वः | കാൽമുട്ട് | ಮೊಣಕಾಲು | knee |
| जीवातुः | जीवनोपाधिः | ജീവനോപാധി | ಜೀವಸತ್ವ | livelihood |
| जैवोर्वरकम् | जैवोर्वरकम् | ജൈവവളം | ಜೈವಗೊಬ್ಬರ | biomanure |
| तल्पम् | शय्या | കിടക്ക | ಹಾಸಿಗೆ | bed |
| तापितम् | सन्तप्तम् | ചുട്ടുപഴുപ്പിച്ച | ಬಿಸಿಮಾಡಿದ | heated |
| दाडिमम् | मातुलङ्गम् | മാതളനാരങ്ങ | ದಾಳಿಂಬೆ | pomegranite |
| निलीय | छन्नः भूत्वा | ഒളിച്ചിട്ട്/മറഞ്ഞിട്ട് | ಅಡಗಿ | having hidden |
| पटोलः | तिक्तकः | പടവലം | ಪಡುವಲ | snakegourd |
| पीडा | वेदना | വേദന | ನೋವು | pain |
| प्रणेता | रचयिता | രചയിതാവ് | ರಚಿಸಿದವನು | author |
| पुष्पशाकम् | शाकपुष्पम् | കോളിഫ്ളവർ | ಹೂಕೋಸು | cauliflower |
| प्रतिदिनम् | दिने दिने | ദിവസവും | ಪ್ರತಿದಿನವೂ | daily |
| बुधैः | पण्डितैः | പണ്ഡിതന്മാരാൽ | ವಿದ್ವಾಂಸರಿಂದ | by wise men |
| भूपालम् | रागविशेषः | ഒരു രാഗം | ಭೂಪಾಲರಾಗ | The name of a raga |
| भेण्डम् | भिण्डिः | വെണ്ടക്കായ | ಬೆಂಡೆಕಾಯಿ | ladies finger |
| मत्वा | निश्चित्य | നിശ്ചയിച്ചിട്ട് | ತಿಳಿದು | being decided |

| | | | | |
|---|---|---|---|---|
| मधुपः | भृङ्गः | വണ്ട് | ದುಂಬಿ | beetle |
| मन्दं मन्दं | शनैः शनैः | പതുക്കെപ്പതുക്കെ | ಮೆಲ್ಲಮೆಲ್ಲನೆ | slowly |
| मध्येमार्गम् | मार्गमध्ये | വഴിമദ്ധ്യത്തിൽ | ದಾರಿಯಲ್ಲಿ | on the way |
| मरिचम् | ऊषणम् | മുളക് | ಮೆಣಸು | chilly |
| मलावरोधः | विबन्धः | മലബന്ധം | ಮಲಬದ್ಧತೆ | constipation |
| मुद्गः | सूपविशेषः | ചെറുപയർ | ಪಚ್ಚೆ ಹೆಸರು | green gram |
| रक्तफलम् | वार्तकी | തക്കാളി | ಟೊಮ್ಯಾಟೋ | tomato |
| रजनी | रात्रिः | രാത്രി | ರಾತ್ರಿ | night |
| रोपितानि | वर्धितानि | വളർത്തിയത് | ಬೆಳೆಸಿದ | nurtured |
| वर्तुलम् | वर्तुकम् | പട്ടാണി | ಬಟಾಣಿ | green peas |
| वास्तुकम् | शाका | ചീര | ಹರಿವೆ | pinach |
| विज्ञाय | ज्ञात्वा | അറിഞ്ഞിട്ട് | ತಿಳಿದು | having known |
| वृन्दाकम् | बृहतीफलम् | വഴുതനങ്ങ | ಬದನೆ | brinjal |
| शाका | शाका | പച്ചക്കറി/ചീര | ತರಕಾರಿ | spinach / vegitable |
| समुदम् | सानन्दम् | സന്തോഷത്തോടെ | ಸಂತೋಷದಿಂತ ಕೂಡಿರುವ | happily |
| सम्पुष्टम् | समृद्धम् | നിറഞ്ഞത് | ಸಂಪೂರ್ಣ | enriched |
| सुमम् | पुष्पम् | പൂവ് | ಹೂವು | flower |
| सूरणकम् | सूरणम् | ചേന | ಸುವರ್ಣಗಡ್ಡೆ | yam |

*अनुबन्धः*

सेवन्ति, अलाबुः, द्राक्षाफलम्, पाटलम्, सूरणम्, कदलीफलम्, जपाकुसुमम्, मरीचम्, आलुकम्, कर्णिकारम्, मल्लिका, सेवा, गोस्तनी, दाडिमम्, पटोलः, वृन्दाकम्, कमलम्, मधुकर्कटी, रक्तफलम्, अनानसम्, पनसम्, पारन्ती, आम्रम्, अशोकम्।

# किमधिगतम्

निर्देशः- प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√) क्रियताम्

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेश निर्देशः | परिहारबोधनम्* (संख्ययासूचितम्) |
|---|---|---|---|---|---|
| १. | बालकविता सतालम् आलपिता। | | | | |
| २. | कवितायाः आशयः स्ववाक्यैः लिखितः। | | | | |
| ३. | वैद्यबालकयोः संभाषणं लिखितम्। | | | | |
| ४. | व्यायामस्य प्राधान्यमधिकृत्य टिप्पणी लिखिता। | | | | |
| ५. | जैवकृषिमधिकृत्य टिप्पणी लिखिता। | | | | |
| ६. | कर्तरि कर्मणि वाक्यानि विवेचितानि। | | | | |

*
१. अध्यापकस्य साहाय्येन। २. सुहृदः साहाय्येन। ३. अन्येषां साहाय्येन।



## एककम्-२

# पुरावृत्तम्

**आमुखम् ।**

धर्मार्थकाममोक्षाणाम् उपदेशसमन्वितम्।

पुरावृत्तपरामर्शम् इतिहासं प्रचक्षते।।

पुरावृत्तम् अमूल्यासंपदेव भवति। धर्मार्थकाममोक्षाणाम् उपदेशसमन्वितानि इतिहासपुराणानि काव्यनाटकादीनि च अस्माकं साहित्यसम्पद् । इतिहासकाव्यं गुरुजनमिव, काव्यनाटकानि मित्रमिव च सुमधुरम् अस्मान् उपदिशति। द्वौ उपदेशौ पश्यतु।

***पठनाधिगमाः***

* गीतासूक्तानि आशयानुसारं समाहरति।
* समानाशययुक्तान् श्लोकान् समाहरति।
* श्लोकान्वयानुसारम् आशयं लिखति।
* कथापात्राणां भागं स्वीकृत्य नाटकम् अवतारयति।
* नाटककथांशं गद्यरूपेण लिखति ।
* प्रश्नवाचकशब्दान् चित्वा प्रयुङ्क्ते।
* लघुटिप्पणीं लिखति।

पञ्चमः पाठः

# गीतासुधामाधुरी

*सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।*

*पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्।।*

*व्यासमुनिना विरचिते महाभारते भीष्मपर्वणि अन्तर्भूता उपनिषत्सारभूता श्लोकसप्तशतैर्युक्ता भवति भगवद्गीता। स्वकर्मविमुखम् अर्जुनं कर्मोत्सुकं कर्तुं पार्थसारथिना कृत उपदेश एव भगवद्गीता। अस्याः द्वितीयाध्यायात् स्वीकृताः चत्वारः श्लोकाः अत्र प्रस्तूयन्ते।*



१. **प्रसादे सर्वदुःखानां**
**हानिरस्योपजायते।**
**प्रसन्नचेतसो ह्याशु**
**बुद्धिः पर्यवतिष्ठते।।**

**पदच्छेदः**

हानिरस्योपजायते - हानिः + अस्य +उपजायते।

प्रसन्नचेतसो ह्याशु - प्रसन्नचेतसः + हि+आशु।

**पदार्थाः**

| | | |
|---|---|---|
| प्रसादे | - | मनःप्रसादे |
| हानिः | - | नाशम् |
| उपजायते | - | संभवति |
| प्रसन्नचेतसः | - | निर्मलमनसः |
| बुद्धिः | - | प्रज्ञा |
| आशु | - | शीघ्रम् |
| पर्यवतिष्ठते | - | एकाग्रतायां वर्तते। |

**अन्वयः**- अस्य प्रसादे सर्वदुःखानां हानिः उपजायते। हि प्रसन्नचेतसः बुद्धिः आशु पर्यवतिष्ठते।

**आशयः**- यस्य मनः प्रसन्नम् भवति तस्य दुःखानि न भवन्ति। तस्य बुद्धिः एकाग्रतां याति।

**२. नास्ति बुद्धिरयुक्तस्य**
**न चायुक्तस्य भावना।**
**न चाभावयतः शान्ति-**
**रशान्तस्य कुतः सुखम्।**

**पदच्छेदः**

बुद्धिरयुक्तस्य - बुद्धिः +अयुक्तस्य।

चायुक्तस्य - च + अयुक्तस्य।

| | | |
|---|---|---|
| चाभावयतः | - | च +अभावयतः। |

**पदार्थाः**

| | | |
|---|---|---|
| अयुक्तस्य | - | मनः संयमनहीनस्य |
| बुद्धिः | - | प्रज्ञा |
| अभावयतः | - | ध्यानाभ्यासहीनस्य (ध्यानरहितस्य) |

**अन्वयः**- अयुक्तस्य बुद्धिः नास्ति। अयुक्तस्य भावना च न। अभावयतः शान्तिः च न। अशान्तस्य कुतः सुखम्?

**आशयः**- इन्द्रियसंयमहीनस्य (एकाग्रताहीनस्य) ज्ञानं नास्ति। तस्य भावनाऽपि न भवति। ध्यानाभ्यासरहितस्य शान्तिः च न भवति। शान्तिहीनः सुखं न कदापि अनुभवति।

३. **इन्द्रियाणां हि चरतां**
**यन्मनोऽनुविधीयते।**
**तदस्य हरति प्रज्ञां**
**वायुर्नावमिवांभसि।।**

**पदच्छेदः**

| | | |
|---|---|---|
| यन्मनोऽनुविधीयते | - | यन्मनः +अनुविधीयते। |
| वायुर्नावमिवांभसि | - | वायुः +नावम् +इव + अम्भसि। |

**पदार्थाः**

| | | |
|---|---|---|
| हि | - | यस्मात् |
| चरताम् | - | प्रवर्तमानानाम् (सञ्चरताम्) |
| इन्द्रियाणाम् | - | चक्षुरादीनाम् इन्द्रियाणाम् |
| अनुविधीयते | - | अनुप्रवर्तते |
| प्रज्ञाम् | - | विवेकम् |

| | | |
|---|---|---|
| अम्भसि | - | जले |
| नावमिव | - | नैकामिव |
| हरति | - | आकर्षति। |

**अन्वयः**

हि चरताम् इन्द्रियाणां यन्मनः अनुविधीयते तदस्य प्रज्ञां वायुः अंभसि नावमिव हरति।

**आशयः**

इन्द्रियानुसारि मनः यस्य अस्ति तस्य विवेकः जले वायुना अलक्ष्यं नीयमाना नौका इव विषयाभिमुखं सञ्चरति।

४. **विहाय कामान्यः सर्वान्**
**पुमांश्चरति निस्पृहः।**
**निर्ममो निरहङ्कारः**
**स शान्तिमधिगच्छति।**

**पदच्छेदः**

| | | |
|---|---|---|
| पुमांश्चरति | - | पुमान् + चरति। |
| शान्तिमधिगच्छति | - | शान्तिम् + अधिगच्छति। |

**पदार्थाः**

| | | |
|---|---|---|
| पुमान् | - | पुरुषः |
| कामान् | - | अभिलाषान् |
| विहाय | - | त्यक्त्वा |
| निस्पृहः | - | निरासक्तः |
| निरहङ्कारः | - | अहङ्काररहितः |

निर्ममः - ममतारहितः

शान्तिम् - मनःशान्तिम्

अधिगच्छति - प्राप्नोति।

**अन्वयः** - यः पुमान् सर्वान् कामान् विहाय निस्पृहः निरहङ्कारः निर्ममः चरति सः शान्तिमधिगच्छति।

**आशयः** - यः पुरुषः सर्वान् कामान् विहाय निरासक्तः अहङ्कारममतारहितः सन् चरति सः सर्वदा शान्तिं प्राप्नोति।

## पठनप्रवर्तनानि



**श्लोकान् सतालमालपतु।**

*श्रद्धेयाः अंशाः-* उचितः तालः।

अक्षरस्फुटता।

आशयावबोधः।



**श्लोकानामाशयं स्ववाक्यैः लिखतु।**

*श्रद्धेयौ अंशौ* - अर्थावगमः।

वाक्यघटना।




**पञ्च, षट्, वा गीतासूक्तानि समाहरतु। कक्ष्यायामवतारयतु।**

*श्रद्धेयौ अंशौ* - समाहरणपटुता।

अवतारणशैली।

# षष्ठः पाठः
# त्वमेव जननी भव



महाकविना भासेन विरचितेषु त्रयोदशरूपकेषु अन्यतममस्ति ऊरुभङ्गम्। महाभारतयुद्धस्य अन्तिमदिने महाराजस्य दुर्योधनस्य स्वर्गप्राप्तिरेव एकाङ्कस्यास्य प्रतिपाद्यः। भीमसेनस्य गदाघातेन विदीर्णोरुः दुर्योधनः रणाङ्कणे अपतत्। तं द्रष्टुं गान्धारीधृतराष्ट्रौ दुर्योधनपुत्रेण दुर्जयेन सममागच्छतः। पितृपुत्रस्नेहस्य हृदयावर्जकं चित्रमेकम् अत्र आलिखितम्।

(नेपथ्ये) उत्सरत आर्याः! उत्सरत। (ततः प्रविशति धृतराष्ट्रो गान्धारी दुर्जयश्च)

धृतराष्ट्रः - पुत्र! क्वासि ?

गान्धारी - पुत्रक! क्वासि ?

धृतराष्ट्रः - भो ! कष्टम् ! अद्य आहवे मम सुतः वञ्चनाहत इति श्रुत्वा अन्तर्गतास्रः मामन्धमन्धतरं कुर्वन्ति। गान्धारि! किं धरसे ?



गान्धारी - जीवितास्मि मन्दभागा।

राजा - भोः ! कष्टम्। यन्ममापि स्त्रियो रुदन्ति। पूर्वं न जानामि गदाभिघातरुजा।

किन्त्विदानीं तज्जानाम्यहम्।

धृतराष्ट्रः - कथं न दृश्यते? योऽहम् अन्वेष्टव्ये काले पुत्रं न पश्यामि। सकृदपि धृतराष्ट्रः पुत्रदत्तं निवापं भोक्तुं किं न योग्यः?

गान्धारी - जात! सुयोधन! देहि मे प्रतिवचनम्।

धृतराष्ट्रः - पुत्र! दुर्योधन! अष्टादशाक्षौहिणीमहाराजः क्वासि?

राजा - अहम् अस्मि महाराजः।

धृतराष्ट्रः - पुत्रशतज्येष्ठ! देहि मे प्रतिवचनम्।

राजा - अन्यद् ददामि खलु वृत्तान्तम्। अनेन वृत्तान्तेन व्रीलितोऽस्मि।

धृतराष्ट्रः - एहि पुत्र! अभिवादयस्व माम्।



राजा - अयमयमागच्छामि। (उत्थानं रूपयित्वा पतति) हा धिक्! अयं मे द्वितीयः प्रहरः। कष्टं भो! मम ऊरुद्वयेन समं गुरोः पादाभिवन्दनमप्यपहृतं भीमसेनेन।

धृतराष्ट्रः - क एष भोः मम वस्त्रान्तमाकर्षन् मार्गमादेशयति?

दुर्जयः - तात! अहं दुर्जयः।

धृतराष्ट्रः - पौत्र! दुर्जय! पितरमन्विष्य?

दुर्जयः - परिश्रान्तः खल्वहम्।

धृतराष्ट्रः - गच्छ पितुरङ्के विश्रामयिष्यसि।

दुर्जयः - तात! अहं गच्छामि। तात! कुत्रासि?

राजा - अये अयमप्यागतः। सर्वावस्थायां हृदयसन्निहितः पुत्रस्नेहो मां दहति।

दुर्जयः - अयं महाराजो भूम्यामुपविष्टः।

राजा - पुत्र! किमर्थमागतः?

दुर्जयः - त्वं चिरायसीति अहमपि खलु ते अङ्के उपविशामि। (अङ्कमारोहति)

राजा - (निवार्य) दुर्जय! दुर्जय! भोः कष्टम्।

**हृदयप्रीतिजननो यो मे नेत्रोत्सवः स्वयम्।**
**सोऽयं कालविपर्यासाच्चन्द्रो वह्नित्वमागतः॥**

दुर्जयः - अङ्के उपवेशं किन्निमित्तं त्वं वारयसि?

राजा - **त्यक्त्वा परिचितं पुत्रो यत्र तत्र त्वयास्यताम्।**
**अद्य प्रभृति नास्तीदं पूर्वभुक्तं तवासनम्॥**

दुर्जयः - कुत्र न खलु महाराजो गमिष्यति?

राजा - भ्रातृशतमनुगच्छामि।

दुर्जयः - मामपि तत्र नय।

| | | |
|---|---|---|
| राजा | - | गच्छ पुत्र! वृकोदरं ब्रूहि। |
| दुर्जयः | - | एहि महाराज! अन्विष्यसे। |
| राजा | - | पुत्र! केन ? |
| दुर्जयः | - | आर्यमार्येण सर्वेणान्तःपुरेण च। |
| राजा | - | गच्छ पुत्र। नाहमागन्तुं समर्थः। |
| दुर्जयः | - | अहं त्वां नेष्यामि। |
| राजा | - | बालस्त्वमसि पुत्र। |
| दुर्जयः | - | (परिक्रम्य) आर्याः अयं महाराजः। |
| गान्धारी | - | कुत्र मे पुत्रकः ? जात! दुर्योधन! परिश्रान्तोसि। किमिति समाश्वासयामि। |
| राजा | - | मातः! विज्ञापयाम्यत्र भवतीम्। |
| गान्धारी | - | भण जात! |
| राजा | - | **नमस्कृत्य वदामि त्वां यदि पुण्यं मया कृतम्।**<br>**अन्यस्यामपि जात्यां मे त्वमेव जननी भव।।** |
| गान्धारी | - | मम मनोरथः खलु त्वया भणितः (इति मूर्छति)।। |



**पदच्छेदः**

| | | |
|---|---|---|
| अन्यतममस्ति | - | अन्यतमम् + अस्ति। |
| स्वर्गप्राप्तिरस्ति | - | स्वर्गप्राप्तिः + अस्ति। |
| क्वासि | - | क्व + असि । |
| जीवितास्मि | - | जीविता + अस्मि। |
| यन्ममापि | - | यत् +मम + अपि। |
| किन्त्विदानीम् | - | किन्तु + इदानीम्। |
| तज्जानाम्यहम् | - | तत् +जानामि+ अहम्। |
| योऽहम् | - | यः +अहम्। |
| अद्यास्मि। | - | अद्य +अस्मि। |
| खल्वहम् | - | खलु +अहम्। |
| किन्निमित्तम् | - | किम् + निमित्तम्। |
| नास्तीदम् | - | नास्ति + इदम्। |
| तवासनम् | - | तव +आसनम्। |
| बालस्त्वमसि | - | बालः + त्वम्+ असि । |

## विग्रहवाक्यम्

| | | |
|---|---|---|
| अन्तर्गतास्राः | - | अन्तर्गताश्च ते अस्राश्च। |
| नेत्रोत्सवः | - | नेत्रयोः उत्सवः। |
| पूर्वभुक्तम् | - | पूर्वं भुक्तः पूर्वभुक्तः, तम् । |
| गदाघातेन | - | गदायाः आघातः गदाघातः, तेन । |

गदाभिघातरुजा - गदायाः अभिघातः गदाभिघातः तेन जाता रुक् गदाभिघातरुक्, तेन।

**अन्वयः**

१. यः हृदयप्रीतिजननः स्वयं नेत्रोत्सवः (अभवत्) सः अयं चन्द्रः कालविपर्यासाद् मे वह्नित्वमागतः।

२. हे पुत्र! अद्य प्रभृति पूर्वभुक्तम् इदं तवासनं न अस्ति ( अतः इदं) परिचितम् आसनं त्यक्त्वा यत्र तत्र त्वया आस्यताम्।

३. त्वां नमस्कृत्य (अहं) वदामि यदि पुण्यं मया कृतम् अन्यस्यामपि जात्यां मे त्वमेव जननी भव।

**सारः**

१. चन्द्र इव यः हृदयाकर्षकः नेत्रानन्दकरः अभवत् सः अयं मम पुत्रः इदानीं विधिवैपरीत्यात् अग्निरिव मे सन्तापं जनयति।

२. दुर्योधनः पुत्रं दुर्जयं वदति। त्वया पूर्वं यदासने उपस्थितं तदासनं इतः परं न लभ्यते। चिरपरिचितम् एतदासनं (अर्थात् दुर्योधनस्याङ्कं) त्यक्त्वा अन्यत्र आस्यताम् इति।

३. दुर्योधनः मातरं गान्धारीं वदति। त्वां नमस्कृत्य अहं वदामि। अस्मिन् जन्मनि मया यत् किमपि पुण्यं कृतं चेत् तस्य पुण्यस्य फलेन जन्मजन्मान्तरेष्वपि हे मातः! त्वमेव मम जननी भव इति।

## पठनप्रवर्तनानि



**नाटकं पठित्वा पितृपुत्रबन्धं- मातृपुत्रबन्धं च अधिकृत्य चर्चां कृत्वा टिप्पणिं लिखतु।**

*श्रद्धेयाः अंशाः-* औचित्यबोधः
वाक्यघटना
आशयपूर्णता



**अस्मात् पाठभागाद् संबोधनान्तप्रथमारूपाणि चित्वा लिखतु।**

*श्रद्धेयौ अंशौ -* विवेचनसामर्थ्यम्
उचितं चयनम्



**प्रश्नोत्तरक्रीडां प्रचालयतु।**

*श्रद्धेयाः अंशाः-* उचिता प्रशनावलिः
उचितमुत्तरम्
पूर्णता



**नाटकं कथारूपेण परिवर्तयतु।**

*श्रद्धेयाः अंशाः-* आशयावबोधः
आशयसंग्रहः
वाक्यघटना



**कथापात्रानुसारं नाटकं कक्ष्यायाम् अवतारयतु।**

*श्रद्धेयाः अंशाः -* अक्षरस्फुटता
भावात्मकता
अवतारणशैली

### पर्यायपदानि

| | | | |
|---|---|---|---|
| १. | पुत्रः | - | सूनुः, तनयः, सुतः। |
| २. | राजा | - | नृपः, भूपतिः, नृपतिः। |
| ३. | वह्निः | - | अग्निः, अनलः। |

## सप्तमः पाठः

# सम्बन्धमाभाषणपूर्वकम्



विश्वप्रसिद्धः महाकविः भवति कविकुलगुरुः कालिदासः। पञ्चमहाकाव्येषु रघुवंशं कुमारसम्भवं च तेन विरचितम्। रघुवंशमहाकाव्यस्य द्वितीयसर्गात् उद्धृतोऽयं पाठभागः।

दिलीपः सूर्यवंशस्य प्रबलः राजा आसीत्। अनपत्यतादुःखेन विषण्णः दिलीपः पत्न्या सुदक्षिणया साकं कुलगुरुं वसिष्ठं द्रष्टुमगमत्। वसिष्ठवचनेन पुत्रलाभार्थं सर्वाभीष्टप्रदायिनीं कामधेनुसुतां नन्दिनीम् असेवत। ततः एकविंशतितमे दिने दिलीपस्य भक्तिं परीक्षितुमिच्छन्ती नन्दिनी हिमालयस्य किमपि गह्वरं प्राविशत्। सपदि केनचित् सिंहेन सा आक्रान्ता किल। तं सिंहं दृष्ट्वा राजा तस्य वधाय शरम् उद्धर्तुम् उद्युक्तोऽभवत्। किन्तु तस्य प्रयत्नः विफलः जातः। तदा सिंहः सः कः , किमर्थम् अत्र तिष्ठति इत्यादिकं तं दिलीपं मनुष्यवाचा अवदत्। गुरोः धेनुं रक्षितुकामः राजा स्वदेहं सिंहाय समर्पयितुम् उद्युक्तः। एतस्मिन्नवसरे सिंहदिलीपयोः संभाषणमेव अत्र सङ्कलितम्।



**१. अथान्धकारं गिरिगह्वराणां**
**दंष्ट्रामयूखैः शकलानि कुर्वन्।**
**भूयः स भूतेश्वरपार्श्ववर्ती**
**किञ्चिद्विहस्यार्थपतिं बभाषे॥**

**पदच्छेदः**

| | | |
|---|---|---|
| अथान्धकारम् | - | अथ +अन्धकारम्। |
| विहस्यार्थपतिम् | - | विहस्य + अर्थपतिम्। |
| स भूतेश्वरपार्श्ववर्ती | - | सः + भूतेश्वरपार्श्ववर्ती। |

| **पदम्** | | **अर्थः** |
|---|---|---|
| अथ | - | अनन्तरम् |
| भूतेश्वरपार्श्ववर्ती | - | शिवस्य अनुचरः |
| सः | - | सः सिंहः |
| गिरिगह्वराणाम् | - | पर्वतगुहानाम् |
| अन्धकारम् | - | तमः |
| दंष्ट्रामयूखैः | - | स्थूलदन्तकिरणैः |
| शकलानि | - | खण्डानि |
| कुर्वन् | - | वितन्वन् |
| किञ्चित् | - | ईषत् |
| विहस्य | - | हसित्वा |
| अर्थपतिम् | - | नृपम् (दिलीपम्) |
| भूयः | - | पुनः |
| बभाषे | - | उवाच। |

**विग्रहः**

| | | |
|---|---|---|
| भूतेश्वरपार्श्ववर्ती | - | भूतानाम् ईश्वरः भूतेश्वरः। पार्श्वे वर्तितुं शीलम् अस्य पार्श्ववर्ती। भूतेश्वरस्य पार्श्ववर्ती। |
| गिरिगह्वराणाम् | - | गिरेः गह्वराणि गिरिगह्वराणि, तेषाम्। |
| दंष्ट्रामयूखैः | - | दंष्ट्राणां मयूखाः दंष्ट्रामयूखाः तैः। |

**आशयः-** अनन्तरं महेशभृत्यः स सिंहः स्वदंष्ट्राशोभया अन्धकारं लघूचकार। ततः किञ्चित् हसित्वा दिलीपं पुनः अवदत्।

**धातुपरिचयः -** बभाषे- भाष व्यक्तायां वाचि लिट् आत्मनेपदि प्रथमपुरुष एकवचनम्।
बभाषे, बभाषाते, बभाषिरे।

२. **एकातपत्रं जगतः प्रभुत्वं**
**नवं वयः कान्तमिदं वपुश्च।**
**अल्पस्य हेतोर्बहुहातुमिच्छन्**
**विचारमूढः प्रतिभासि मे त्वम्॥**

**पदच्छेदः**

| | | |
|---|---|---|
| वपुश्च | - | वपुः + च। |
| हेतोर्बहुहातुमिच्छन् | - | हेतोः +बहु + हातुम् +इच्छन्। |

| **पदम्** | | **अर्थः** |
|---|---|---|
| एकातपत्रम् | - | एकच्छत्रम् |
| जगतः | - | लोकस्य |
| प्रभुत्वम् | - | स्वामित्वम् |
| नवं वयः | - | तारुण्यम् |
| इदम् | - | एतत् |
| कान्तम् | - | रम्यम् |
| वपुश्च | - | शरीरं च |
| बहु | - | सर्वम् |
| अल्पस्य हेतोः | - | अल्पेन कारणेन (तुच्छवस्तु रक्षणार्थम्) |
| हातुम् | - | त्यक्तुम्। |

| | | |
|---|---|---|
| इच्छन् | - | अभिलषन् |
| त्वम् | - | भवान् |
| विचारमूढः | - | कार्याकार्यविचारे मूर्खः |
| प्रतिभासि | - | लक्ष्यते। |

**विग्रहः**

| | | |
|---|---|---|
| एकातपत्रम् | - | एकं च तत् आतपत्रं च। |
| प्रभुत्वम् | - | प्रभोः भावः। |
| विचारमूढः | - | विचारे मूढः। |

**आशयः-** चक्रवर्तित्वं लोकस्य स्वामित्वं नवतारुण्यं सुन्दरं शरीरञ्च भवतः अस्ति। एतत् सर्वम् अल्पफलाय त्यक्तुमिच्छसि। एतादृशः भवान् चिन्तारहितः इति अहं मन्ये।

**धातुपरिचयः**

प्रतिभासि- प्रति इत्युपसर्गपूर्वक भा दीप्तौ लट् मध्यमपुरुषैकवचनम्।

प्रतिभासि- प्रतिभाथः - प्रतिभाथ।

व्याकरणविशेषः- अल्पस्य हेतोः -'षष्ठी हेतूप्रयोगे 'इति सूत्रेण हेतुप्रयोगे अल्पस्य इति षष्ठी।

३. **भूतानुकम्पा तव चेदियं गौ-**
**रेका भवेत् स्वस्तिमती त्वदन्ते।**
**जीवन् पुनः शश्वदुपप्लवेभ्यः**
**प्रजाः प्रजानाथ! पितेव पासि।।**

**पदच्छेदः**

| | | |
|---|---|---|
| चेदिदम् | - | चेत् + इदम्। |
| गौरेका | - | गौः +एका। |
| शश्वदुपप्लवेभ्यः | - | शश्वत् +उपप्लवेभ्यः। |
| पितेव | - | पिता + इव। |

| पदम् | | अर्थः |
|---|---|---|
| तव | - | भवतः |
| भूतानुकम्पा | - | प्राणिषु कृपा |
| चेत् | - | यदि अस्ति |
| त्वदन्ते | - | तव नाशे |
| इयम् | - | एषा (नन्दिनी) |
| एका | - | केवला |
| गौः | - | नन्दिनी धेनुः |
| स्वस्तिमती | - | क्षेमवती |
| प्रजानाथ ! | - | हे जनेश्वर ! |
| जीवन् | - | प्राणान् धरन् |
| पुनः | - | भूयः |
| पिता इव | - | जनकः इव |
| प्रजाः | - | जनान् |
| उपप्लवेभ्यः | - | उपद्रवेभ्यः |
| शश्वत् | - | सदा |
| पासि | - | त्रायसे। |

**विग्रहः**

| | | |
|---|---|---|
| भूतानुकम्पा | - | भूतेषु अनुकम्पा। |
| त्वदन्तः | - | तव अन्तः। |
| स्वस्तिमती | - | स्वस्ति अस्याः अस्तीति। |
| प्रजानाथ! | - | प्रजानां नाथः प्रजानाथः, तत्सम्बुद्धौ। |

**आशयः-** प्राणिनां कृते भवतः नितराम् अनुकम्पा अस्ति इति अहं मन्ये। एकस्याः धेनोः कृते स्वप्राणान् विहातुं भवान् इच्छति। परं त्वं प्राणान् धारयसि चेत् पिता इव सर्वाणि भूतजालानि पातुं शक्नोषि।

**धातुपरिचयः-** पासि- पा रक्षणे लट् परस्मैपदि मध्यमपुरुष एकवचनम्।
पासि पाथः पाथ।

**४. तद्रक्ष कल्याणपरम्पराणां**
**भोक्तारमूर्जस्वलमात्मदेहम्।**
**महीतलस्पर्शनमात्रभिन्न-**
**मृद्धं हि राज्यं पदमैन्द्रमाहुः।**

**पदच्छेदः**

| | | |
|---|---|---|
| तद्रक्ष | - | तत् +रक्ष। |
| भोक्तारमूर्जस्वलमात्मदेहम् | - | भोक्तारम् +ऊर्जस्वलम् +आत्मदेहम्। |
| महीतलस्पर्शनमात्रभिन्नमृद्धम् | - | महीतलस्पर्शनमात्रभिन्नम् +ऋद्धम्। |
| पदमैन्द्रमाहुः | - | पदम् +ऐन्द्रम् +आहुः। |

| **पदम्** | | **अर्थः** |
|---|---|---|
| तत् | - | तस्मात् हेतोः |
| कल्याणपरम्पराणाम् | - | मङ्गलश्रेणीनाम् |
| भोक्तारम् | - | अनुभवन्तम् |
| ऊर्जस्वलम् | - | बलवन्तं |
| आत्मदेहम् | - | निजं शरीरम् |

| | | |
|---|---|---|
| रक्ष | - | पालय |
| हि | - | यतः |
| विद्वांसः | - | मनीषिणः |
| ऋद्धम् | - | समृद्धम् |
| राज्यम् | - | राज्यम् |
| महीतलस्पर्शनमात्रभिन्नम् | - | भूतलस्पर्शेन परं पृथग् भूतम् |
| ऐन्द्रम् पदम् | - | इन्द्रसंबन्धिस्थानम् (स्वर्गम्) |
| आहुः | - | कथयन्ति। |

**विग्रहः-**

| | | |
|---|---|---|
| कल्याणपरम्पराणाम् | - | कल्याणानां परम्पराः कल्याणपरम्पराः तासाम्। |
| ऊर्जस्वलम् | - | ऊर्जः अस्यास्तीति ऊर्जस्वलः तम्। |
| आत्मदेहम् | - | आत्मनः देहः आत्मदेहः तम्। |
| महीतलस्पर्शनमात्रभिन्नम् | - | मह्याः तलं महीतलं, तस्य स्पर्शनं, महीतलस्पर्शनं तदेव प्रमाणमस्येति महीतलस्पर्शनमात्रं तेन भिन्नम्। |
| ऐन्द्रम् | - | इन्द्रस्य इदम्। |

**आशयः-** मनीषिणः सुसमृद्धं राज्यं भूलोकस्वर्गमिति वदन्ति। अतः तस्य परिपालनार्थं समस्तमङ्गलानाम् अनुभोक्तारं स्वशरीरं पालय।

**धातुपरिचयः-** आहुः- ब्रूञ् व्यक्तायां वाचि लट् परस्मैपदी प्रथमपुरुष बहुवचनम्।

आह, आहतुः, आहुः।

५. **निशम्य देवानुचरस्य वाचं**
**मनुष्यदेवः पुनरप्युवाच।**
**धेन्वा तदध्यासितकातराक्ष्या**
**निरीक्ष्यमाणः सुतरां दयालुः।।**

**पदच्छेदः**

पुनरप्युवाच - पुनः +अपि+ उवाच।

| **पदम्** | | **अर्थः** |
| --- | --- | --- |
| देवानुचरस्य | - | महादेवस्य अनुचरस्य |
| वाचम् | - | वचनम् |
| निशम्य | - | श्रुत्वा |
| तदध्यासितकातराक्ष्या | - | तदध्यासितत्वाद् भयार्द्रलोचनया |
| धेन्वा | - | नन्दिन्या |
| निरीक्ष्यमाणः | - | विलोक्यमानः |
| सुतराम् | - | नितराम् |
| दयालुः (सन्) | - | दयार्द्रः (सन्) |
| मनुष्यदेवः | - | नरेशः (दिलीपः) |
| पुनरपि | - | भूयोऽपि |
| उवाच | - | अकथयत्। |

**विग्रहः**


देवानुचरस्य- देवस्य अनुचरः देवानुचरः तस्य।

तदध्यासितकातराक्ष्या - तेन अध्यासितं तदध्यासितं तदध्यासितेन कातरे अक्षिणी यस्याः सा तदध्यासितकातराक्षी, तया।

**धातुपरिचयः**- उवाच- ब्रूञ् व्यक्तायां वाचि धातोः लिट् परस्मैपदी प्र.पु एकवचनम्।
उवाच, ऊचतुः, ऊचुः।

**आशयः**- नन्दिनी सिंहस्य प्रवृत्या भयार्द्रलोचना भूत्वा राजानम् ईक्षितवती। तदा आर्द्रहृदयः राजा दिलीपः महेश्वरभृत्यस्य सिंहस्य वाचं श्रुत्वा पुनरपि अवदत्।

६. **क्षतात् किल त्रायत इत्युदग्रः**
**क्षत्रस्य शब्दो भुवनेषु रूढः।**
**राज्येन किं तद्विपरीतवृत्तेः**
**प्राणैरुपक्रोशमलीमसैर्वा।।**



**पदच्छेदः**

| | | |
|---|---|---|
| त्रायत इत्युदग्रः | - | त्रायते + इति + उदग्रः। |
| शब्दो भुवनेषु | - | शब्दः + भुवनेषु। |
| प्राणैरुपक्रोशमलीमसैर्वा | - | प्राणैः + उपक्रोशमलीमसैः +वा। |

| **पदम्** | | **अर्थः** |
|---|---|---|
| उदग्रः | - | उन्नतः |
| क्षत्रस्य | - | क्षत्रवर्णस्य (क्षत्रियवंशस्य) |
| शब्दः | - | वाचकः |
| क्षतात् | - | नाशात् |

| | | |
|---|---|---|
| त्रायते | - | रक्षति |
| इति | - | इति |
| भुवनेषु | - | लोकेषु |
| रूढः | - | प्रसिद्धः |
| किल | - | (निश्चयार्थे) |
| तद्विपरीतवृत्तेः | - | क्षत्रियवर्गस्य विरुद्धव्यापारवतः |
| राज्येन | - | राजभावेन |
| वा | - | अथवा |
| उपक्रोशमलीमसैः | - | निन्दामलिनैः |
| प्राणैः | - | असुभिः |
| किम् | - | किं प्रयोजनम्। |

**विग्रहः**

क्षत्रस्य - क्षतात् त्रायते इति क्षत्रः तस्य ।

तद्विपरीतवृत्तेः - तस्य विपरीता तद्विपरीता, तद्विपरीता वृत्तिः यस्य सः तद्विपरीतवृत्तिः तस्य।

उपक्रोशमलीमसैः- उपक्रोशेन मलीमसाः उपक्रोशमलीमसाः तैः।

**आशयः**- क्षतात् त्रायते इत्यर्थे एव क्षत्र शब्दः लोके प्रसिद्धः खलु। तस्य विरुद्धव्यापारवतः राज्ञः राजभावेन एतादृशैः निन्दनीयैः प्राणैः वा किं प्रयोजनम्?

७. **भवानपीदं परवानवैति**
**महान् हि यत्नस्तव देवदारौ।**
**स्थातुं नियोक्तुर्न हि शक्यमग्रे**
**विनाश्य रक्ष्यं स्वयमक्षतेन।।**

**पदच्छेदः**

भवानपीदम् - भवान् +अपि + इदम्।

यत्नस्तव - यत्नः + तव।

नियोक्तुर्न - नियोक्तुः + न।

परवानवैति - परवान् + अवैति।

| **पदम्** | | **अर्थः** |
|---|---|---|
| परवान् | - | पराधीनः (स्वामिनः अधीनः) |
| भवानपि | - | त्वमपि |
| इदम् | - | अदः |
| अवैति | - | जानाति |
| हि | - | यतः |
| तव | - | भवतः |
| देवदारौ | - | देवदारुवृक्षविषये (तद्रक्षणविषये) |
| महान् | - | अतिशयः |
| यत्नः | - | प्रयत्नः |
| रक्ष्यम् | - | रक्षितुं योग्यम् |
| विनाश्य | - | नाशयित्वा |
| स्वयम् | - | आत्मना |
| अक्षतेन | - | अनाहतेन |
| नियोक्तुः | - | नियन्तुः |
| अग्रे | - | पुरतः |
| स्थातुं न शक्यम् | - | स्थितिं कर्तुम् असाध्यम् |
| हि | - | एव। |

**विग्रहः**

| | | |
|---|---|---|
| परवान् | - | परः (स्वामी) अस्यास्तीति। |
| अक्षतेन | - | न क्षतः अक्षतः, तेन। |

**आशयः**- स्वामिनः अधीनः भवानपि कर्तव्यमहत्वं जानाति। यतः भवतः पुरोवर्तिनः देवदारोः रक्षणे अत्यन्तं प्रयासः अस्ति। पालनीयं वस्तु नाशयित्वा स्वयमक्षतः सन् नियोक्तुः पुरतः स्थातुं न केनापि शक्यते।

८. सम्बन्धमाभाषणपूर्वमाहु-
वृंत्तः स नौ सङ्गतयोर्वनान्ते।
तद्भूतनाथानुग! नार्हसि त्वं
सम्बन्धिनो मे प्रणयं विहन्तुम्।।

**पदच्छेदः**-

| | |
|---|---|
| सम्बन्धमाभाषणपूर्वमाहुर्वृत्तः | - सम्बन्धम् +आभाषणपूर्वम् +आहुः +वृत्तः। |
| सङ्गतयोर्वनान्ते | - सङ्गतयोः +वनान्ते। |
| नार्हसि | - न + अर्हसि। |
| सम्बन्धिनो मे | - सम्बन्धिनः +मे। |

| **पदम्** | | **अर्थः** |
|---|---|---|
| सम्बन्धम् | - | सख्यम् |
| आभाषणपूर्वम् | - | संलापपूर्वकम् |
| आहुः | - | ब्रुवन्ति |
| सः | - | सः सम्बन्धः (सख्यम्) |
| वनान्ते | - | अरण्यमध्ये |
| सङ्गतयोः | - | मिलितयोः |
| नौ | - | आवयोः |

| | | |
|---|---|---|
| वृत्तः | - | सम्भूतः |
| तत् | - | तस्मात् हेतोः |
| भूतनाथानुग! | - | शिवानुचर! |
| त्वम् | - | त्वं मृगेन्द्रः |
| सम्बन्धिनः | - | सख्यरूपसम्बन्धयुक्तस्य |
| मे | - | मम |
| प्रणयम् | - | सख्यम् |
| विहन्तुम् | - | नाशयितुम् |
| न | - | न हि |
| अर्हसि | - | योग्योऽसि। |

**विग्रहः-**

भूतनाथानुग! - भूतानां नाथः भूतनाथः तं, भूतानाथम्। भूतनाथम् अनुगच्छति इति भूतनाथानुगः, तस्य सम्बुद्धिः।

**आशयः-** परस्परभाषणेन सम्बन्धः भवति इति विज्ञाः वदन्ति। स सम्बन्धः वनान्ते आवयोः जातः। तस्मात् हे भूतनाथानुचर! बन्धोः मम स्नेहं त्यक्तुं न योग्योऽसि।

## पठनप्रवर्तनानि



**सतालं श्लोकान् आलपतु।**

*श्रद्धेयाः अंशाः -* अक्षरस्फुटता।
उचितस्थाने यतिः।
आशयव्यक्तता।



### श्लोकानाम् अन्वयं लिखतु।

*श्रद्धेयौ अंशौ -* श्लोकान्तर्गतपदानां स्वीकारः।
अन्वयक्रमः।



### सिंहदिलीपयोः भाषणं गद्यरूपेण लिखित्वा अवतारयतु।

*श्रद्धेयाः अंशाः-* उचितपदावली।
श्लोकानाम् आशयः।
क्रमीकरणम्।



### मृगराजनरराजयोः संभाषणे कानि कानि मूल्यानि परामृष्टानि ? टिप्पणिं लिखतु।

*श्रद्धेयाः अंशाः-* उचिता पदावली।
श्लोकानाम् आशयः।
क्रमीकरणम्।

**अनुबन्धः**

**ब्रूञ् व्यक्तायां वाचि लिट् परस्मैपदि**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र.पु | उवाच | ऊचतुः | ऊचुः |
| म.पु. | उवचिथ/उवक्थ | ऊचथुः | ऊच |
| उ.पु | उवाच/उवच | ऊचिव | ऊचिम |

**भाष व्यक्तायां वाचि- लिट् आत्मनेपदी**

| | | |
|---|---|---|
| बभाषे | बभाषाते | बभाषिरे |
| बभाषिषे | बभाषाथे | बभाषिध्वे |
| बभाषे | बभाषिवहे | बभाषिमहे |

**(प्रति) इत्युपसर्गपूर्वक भा दीप्तौ लट् परस्मैपदि रूपाणि**

| | | |
|---|---|---|
| प्रतिभाति | प्रतिभातः | प्रतिभान्ति |
| प्रतिभासि | प्रतिभाथः | प्रतिभाथ |
| प्रतिभामि | प्रतिभावः | प्रतिभामः। |

**पा रक्षणे लट्**

| | | |
|---|---|---|
| पाति | पातः | पान्ति |
| पासि | पाथः | पाथ |
| पामि | पावः | पामः। |

**ब्रूञ् व्यक्तायां वाचि लट्**

| | | |
|---|---|---|
| आह | आहतुः | आहुः |
| (ब्रवीति | ब्रूतः | ब्रुवन्ति) |
| आत्थ | आहथुः | ब्रूथ |
| (ब्रवीषि | ब्रूथः | ब्रूथ) |
| ब्रवीमि | ब्रुवः | ब्रूमः |

**अर्ह पूजायाम् लट्**

| | | |
|---|---|---|
| अर्हति | अर्हतः | अर्हन्ति |
| अर्हसि | अर्हथः | अर्हथ |
| अर्हामि | अर्हावः | अर्हामः |

**अव +इण् गतौ लट् प.प**

| | | |
|---|---|---|
| अवैति | अवेतः | अवयन्ति |
| अवैषि | अवेथः | अवेथ |
| अवैमि | अवेवः | अवेमः। |

**अमरकोशः**

अन्धकारोऽस्त्रियां ध्वान्तम्।

देवखातबिले गुहा गह्वरम्।

किरणोऽस्रमयूखांशुगर्भस्तिर्धृणिरश्मयः।

भित्तं शकलखण्डे वा।

किञ्चिदीषत् मनागर्थे।

जगती लोको विष्टपं भुवनं जगत्।

नवीनो नूतनो नवः।

कान्तं मनोरमं रुच्यम्।

गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः।

कृपा दयानुकम्पा स्यादनुक्रोशः।

अन्तो नाशो द्वयोर्मृत्युर्मरणं निधनोऽस्त्रियाम्।

श्वः श्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम्।

ऊर्जस्वलः स्यादूर्जस्वा यः ऊर्जातिशयान्वितः।

ऋद्धम् सम्पन्नधान्ये च सुसमृद्धौ च वाच्यम्।

सिंहो मृगेन्द्रः पञ्चास्यः।

**पञ्चपितरः**

जनिता चोपनेता च यश्च विद्यां प्रयच्छति।
अन्नदाता भयस्त्राता पञ्चैते पितरः स्मृताः।।

# शब्दकोशः

| पदम् | संस्कृतम् | मलयालम् | कन्नटा | आङ्गलम् |
|---|---|---|---|---|
| अनुगच्छति | अनुसरति | പിൻതുടരുന്നു | ಹಿಂಬಾಲಿಸುತ್ತಾನೆ,ಳೆ | follows |
| अन्यतमम् | अनेकेषु एकम् | പലതിലൊന്ന് | ಮತ್ತೊಬ್ಬನನ | one among many |
| अन्विष्य | अन्येषणं कृत्वा | അന്വേഷിച്ച് | ಹುಡುಕಿ | being searched |
| आसनं | आसन्दः | ഇരിപ്പിടം | ಆಸನ , ಕುರ್ಚಿ | seat |
| अवैमि | जानामि | അറിയുന്നു | ತಿಳಿಯುತ್ತಾನೆ,ಳೆ | I knows |
| उद्विग्नं | प्रक्षुभितम् | പ്രക്ഷുബ്ധമായ | ಉದ್ವಿಗ್ನ | ajitated |
| उदग्रः | उन्नतः | ഉയർന്നത് | ಎತ್ತರವಾದ | high |
| उत्सरत | अपगच्छत | മാറിപ്പോകുക | ಮೇಲಕ್ಕೆಹೋಗಿ | give way |
| ऋद्धं | समृद्धम् | സമൃദ്ധം | ಸಮೃದ್ಧವಾದ | rich |
| ऐन्द्रं | इन्द्रसम्बन्धि | ഇന്ദ്രനെ സംബന്ധിച്ച | ಇಂದ್ರನ | pertaining to Indra |
| कान्तं | रम्यम् | മനോഹരം | ಮನೋಹರ | attractive |
| कामः | तृष्णा | മോഹം | ಆಸೆ | desire |
| क्रोधः | कोपः | കോപം | ಕೋಪ | anger |
| निवापः | पितृतर्पणम् | പിതൃതർപ്പണം | ಶ್ರಾದ್ಧ | offerings due to forefathers |
| निस्पृहः | निरासक्तः | ആസക്തിയില്ലാത്ത | ನಿರಾಸಕ್ತ | without attachments |
| पदम् | स्थानम् | സ്ഥാനം | ಹುದ್ದೆ | position |

| | | | | |
|---|---|---|---|---|
| परिश्रान्तः | क्षीणः | ക്ഷീണിതൻ | ಬಳಲಿದ | tired |
| पासि | त्रायसे | രക്ഷിക്കുക | ರಕ್ಷಿಸುತ್ತಿ | you protect |
| प्रभुत्वं | स्वामित्वं | മേധാവിത്വം | ಒಡೆತನ | lordship |
| बभाषे | उवाच | പറഞ്ഞു | ಹೇಳಿದನು,ಳು | told |
| भूयः | पुनः | വീണ്ടും | ಪುನಃ | again |
| यत्नः | प्रयत्नः | പ്രയത്നം | ಪ್ರಯತ್ನ | effort |
| रूढः | प्रसिद्धः | പ്രസിദ്ധമായത് | ಪ್ರಸಿದ್ಧ | famous |
| वपुः | शरीरम् | ശരീരം | ಶರೀರ | body |
| वह्निः | अग्निः | അഗ്നി | ಬೆಂಕಿ | fire |
| विगतः | निर्गतः | പൊയ്പോയ | ಹೋದ | gone |
| विद्वांसः | मनीषिणः | പണ്ഡിതൻ | ವಿದ್ವಾಂಸ | wise man |
| विहन्तुं | नाशयितुं | നശിപ്പിക്കുവാൻ | ಕೊಲ್ಲಲು | to distory |
| व्रीलितः | लज्जितः | ലജ്ജിതനായി | ನಾಚಿಕೆ ಗೊಂಡವನು,ಳು | become shy |
| शकलानि | खण्डानि | കഷ്ണങ്ങൾ | ತುಂಡುಗಳು | pieces |
| शश्वत् | सदा | എപ്പോഴും | ಯಾವಾಗಲೂ | always |
| सम्बन्धं | सख्यम् | സഖ്യം | ಸಂಬಂಧ | friendship |
| संगः | आसक्तिः | സംസർഗ്ഗം | ಒಡನಾಟ | association |
| स्थातुम् | स्थितिं कर्तुं | നിൽക്കുവാൻ | ನಿಲ್ಲಲು | to stand |
| स्पृहा | इच्छा | ആഗ്രഹം | ಬಯಕೆ | wish |
| सुतरां | नितरां | വളരെയധികം | ಅತ್ಯಂತ | plenty of |
| हातुं | त्यक्तुं | ഉപേക്ഷിക്കുന്നതിന് | ತ್ಯಜಿಸಲು | to get rid of |

# किमधिगतम्

निर्देशः- प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√) क्रियताम्

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेश निर्देशः | परिहारबोधनम्* (संख्यया सूचितम्) |
|---|---|---|---|---|---|
| १. | गीताश्लोकानाम् आशयः स्ववाक्यैः लिखितः। | | | | |
| २. | गीतासूक्तानि समाहृतानि अवतारितानि च। | | | | |
| ३. | कथापात्रानुसारं नाटकमवतारितम्। | | | | |
| ४. | सम्बोधनान्तरूपाणि चितानि। | | | | |
| ५. | श्लोकानाम् अन्वयः लिखितः | | | | |
| ६. | श्लोकेषु प्रतिपादितानां मूल्यानां टिप्पणिः लिखिता। | | | | |

*

१. अध्यापकस्य साहाय्येन। २. सुहृदः साहाय्येन। ३. अन्येषां साहाय्येन।



एककम्- ३

# न्यायवृत्तम्

*लौकिकव्यवहारेषु स्वकीयम् अभिमतं स्थापयितुं प्रसङ्गवशात् न्यायान् उदाहरति। संस्कृतसाहित्ये बहवः सन्ति लौकिकन्यायाः। तेषां केवलपरिचायनाय लौकिकन्यायावलिः अत्रायोजिता। प्रकृतिसिद्धं स्वभावम् अपाकर्तुं कोऽपि न शक्तः इति तत्त्वं स्थापयितुं कल्पितकथा च समायोजिता।*

**पठनाधिगमाः**

* उचितेषु सन्दर्भेषु लौकिकन्यायान् प्रयुङ्क्ते।
* कथानां साहाय्येन न्यायं समर्थयति।
* न्यायान् समाहरति।
* भावानुसारं कथां कथयति।
* कथाः सञ्चिनोति।
* विषयानुसारं कथां लिखति।
* भूतकालक्रियापदानि चित्वा लिखति।

## अष्टमः पाठः

# लौकिकन्यायाः

*लोके शास्त्रे च स्वाभिप्रायान् स्पष्टीकर्तुं केचन दृष्टान्ताः उपयुक्ताः। तान् दृष्टान्तान् आधारीकृत्य लोकोक्तयो जाताः। त एव लौकिकन्यायाः इति प्रसिद्धाः। विशालमाशयं संक्षेपेण प्रतिपाद्यत इत्येव एषां विशेषः। संस्कृतभाषायां प्रसिद्धाः बहवो न्यायास्सन्ति। तेषु कांश्चन न्यायान् पाठेऽस्मिन् परिचिनुमः।*

### १. कूपमण्डूकन्यायः।

कस्मिंश्चित् कूपे कश्चन मण्डूकोऽवसत्। तं कूपं विहाय स नान्यत्किमपि अजानात्। अयं कूप एव लोक इति सोऽचिन्तयत्। एकदा अन्यः मण्डूकः तस्मिन् कूपे अपतत्। “भवान् कुतः आयाति?” कूपमण्डूकोऽपृच्छत्। “तटाकादागच्छामि” स प्रत्यवदत्। “तटाकः? किं तत्? कूपात् अपरो लोको वा?” साश्चर्यमपृच्छत् कूपमण्डूकः। तच्छ्रुत्वा उच्चैरहसत् नवागतः।

कूपे वर्तमानस्य मण्डूकस्य बाह्यलोकमधिकृत्य ज्ञानं नास्ति। अयं कूप एव सर्वं विश्वमिति स चिन्तयति। तद्वत् बाह्यलोकं ये न जानन्ति तादृशान् अल्पज्ञान् अधिकृत्य न्यायोऽयं प्रयुज्यते।

## २. अन्धपङ्गुन्यायः



कस्मिंश्चित् ग्रामे कश्चन अन्धः पङ्गुश्च आस्ताम्। एकदा द्वयोरपि एकत्रैव गन्तव्यम् अभवत्। किन्तु स्वयं गन्तुं द्वावपि असमर्थौ। अन्धः चलितुं शक्तः पङ्गुः सम्यक् द्रष्टुञ्च। अतः तावेकम् उपायं कृतवन्तौ। पङ्गुः अन्धस्य स्कन्धमारुह्य मार्गम् अदर्शयत्। तदनुसारम् अन्धः अचलच्च। एवं द्वावपि प्रत्यभिज्ञातवैभवौ लक्ष्यं प्राप्तवन्तौ।

एवं विभिन्नसामर्थ्ययुक्तानां परस्परसाहाय्येन लक्ष्यं सिद्ध्यतीति अस्य न्यायस्य आशयः।



## ३. स्थालीपुलाकन्यायः

पाकसमये पुलाकस्य पाकनिर्णयार्थं द्वित्रान् कणान् परीक्ष्य पाकं निश्चिनोति। तथा एकस्मात् समुदायात् तत्समुदायस्य अवस्था एकं द्वौ वा परीक्ष्य सामान्यतया निर्णीयते। तादृशसन्दर्भेषु न्यायस्यास्य प्रवृत्तिः।

## ४. अरण्यरोदनन्यायः

अरण्ये कियदपि रोदनं कृतं चेदपि तत् व्यर्थमेव । न कोऽपि शृणोति। अत एव साहाय्यमपि न लभते। एवं यत्र कर्मणः निष्फलत्वं सूचयति तत्र अयं न्यायः प्रवर्तते।

## पदच्छेदः

| | | |
|---|---|---|
| लोकोक्तयो जाताः | - | लोकोक्तयः + जाताः। |
| त एव | - | ते +एव। |
| बहवो न्यायास्सन्ति | - | बहवः +न्यायाः +सन्ति। |
| पाठेऽस्मिन् | - | पाठे +अस्मिन्। |
| मण्डूकोऽवसत् | - | मण्डूकः + अवसत् । |
| कूप एव | - | कूपः+एव। |
| लोक इति | - | लोकः +इति। |
| सोऽचिन्तयत् | - | सः +अचिन्तयत्। |
| मण्डूकोऽपृच्छत् | - | मण्डूकः +अपृच्छत्। |
| तटाकादागच्छामि | - | तटाकात्+आगच्छामि। |
| तच्छ्रुत्वा | - | तत् +श्रुत्वा। |
| उच्चैरहसत् | - | उच्चैः +अहसत्। |
| स चिन्तयति | - | सः +चिन्तयति। |
| तावेकाम् | - | तौ +एकाम्। |
| अचलच्च | - | अचलत् +च। |
| द्वावपि | - | द्वौ +अपि। |
| द्रष्टुञ्च | - | द्रष्टुं +च। |
| द्वयोर्वा | - | द्वयोः+ वा। |
| सिद्ध्यतीति | - | सिद्ध्यति + इति |
| व्यर्थमेव | - | व्यर्थम् + एव। |

## विग्रहः

लौकिकन्यायाः- लोके भवः लौकिकः । नीयते अनेनेति न्यायः। लौकिकाश्च ते न्यायाश्च लौकिकन्यायः ते।

स्वाभिप्रायान् - स्वस्य अभिप्रायः स्वाभिप्रायः, तान् ।

लोकोक्तयः - लोकानाम् उक्तिः लोकोक्तिः, ताः।
लघुवाक्येन - लघु वाक्यं, तेन।
संस्कृतभाषा - सम्यक् कृतं संस्कृतं, भाष्यते अनया इति भाषा। संस्कृता च इयं भाषा च।
साश्चर्यम् - आश्चर्येण सह वर्तत इति
कूपमण्डूकः - कूपे विद्यमानः मण्डूकः ।
अल्पज्ञान् - अल्पं जानातीति, तान्।

# पठनप्रवर्तनानि



**पाठभागं सम्यक् पठित्वा अधो दत्तेषु वाक्येषु कः न्यायः इति लिखतु।**

१ अल्पज्ञः सः सर्वज्ञभावं प्रकटयति।
२ अस्थाने कृतं कर्म फलं न जनयति।
३ परस्पराश्रयत्वेन लक्ष्यप्राप्तिः।
४ द्राक्षाफलगुच्छात् एकं खादित्वा सर्वं पक्वमिति निश्चिनोति।



**पठितान् न्यायान् आधारीकृत्य अन्यान् सन्दर्भान् लिखतु।**

*श्रद्धेयौ अंशौ-* उचितस्य सन्दर्भस्य चयनम्।
सयुक्तिकं समायोजनम्।



**लौकिकन्यायान् सञ्चिनोतु। चार्ट्पत्रे विलिख्य वर्गे अवतारयतु।**

*श्रद्धेयाः अंशाः-* यथाकालं सञ्चयः।
उचितं क्रमीकरणम्।
आकर्षकं लेखनम्।

## नवमः पाठः

# सर्गवैचित्र्यम्

कस्यचन गृहस्य परिसरे काचित् अलाबुलता आसीत्। तस्यां बहूनि फलान्यपि आसन्। तत्समीपे आकाशे हरितानि पर्णानि विस्तार्य नारिकेलवृक्षाः अप्यासन्। तान् दृष्ट्वा कदाचित् अलाबुलता एवमचिन्तयत् "एषः वृक्षः उज्वलं सूर्यप्रकाशं शुद्धवायुं चानुभूय सानन्दं तिष्ठति। मया तु जनानां पादाघातैः महान् क्लेशः अनुभूयते"।




सा भक्त्या प्रकृतिमातरं प्रार्थयत- ''मातः मामपि नारिकेलवृक्ष इव उन्नतिं प्रापयतु'' इति।

प्रकृतिः तस्याः प्रार्थनाम् अङ्गीकृतवती। अन्येद्युः प्रभाते सा लता नारिकेलवृक्ष इव उन्नतिं प्राप्ता। यथेच्छं सूर्यप्रकाशं शुद्धवायुं च अनुभूय तोषमवाप। परं फलानां भारं वोढुमशक्ता अलाबुलता भूमौ अपतत्। सर्वाणि फलानि विदीर्णानि अभवन्। अलाबुलता नितरां शोकाकुला अभवत्।

सा पुनरपि प्रार्थयत- ''मातः! मया यत् प्रार्थितं तदनुचितमेव। कृपया मम अपराधः क्षम्यताम्'' इति। तत् श्रुत्वा सन्तुष्टा प्रकृतिः अलाबुलताम् अवदत्-

''मदीयसृष्टौ जीविनां गुणाः स्वभावजाः भिन्नाश्च कल्पिताः। तेषु कदापि स्पर्धा न भवेत्। यतः सर्वेषामपि जीविनां सृष्टेः फलं जगत्कल्याणमेव। त्वं यथापूर्वं भव'' इति।

पूर्वावस्थां प्राप्ता अलाबुलता सन्तुष्टा अभवत्।



**पदच्छेदः-**

| | | |
|---|---|---|
| फलान्यपि | - | फलानि + अपि। |
| एवमचिन्तयत् | - | एवम् +अचिन्तयत्। |
| नारिकेलवृक्ष इव | - | नारिकेलवृक्षः+ इव |
| तोषमवाप | - | तोषम् +अवाप। |
| विदीर्णमभवत् | - | विदीर्णम् + अभवत्। |
| पुनरपि | - | पुनः + अपि। |
| भिन्नाश्च | - | भिन्नाः + च। |


# पठनप्रवर्तनानि



**पाठभागात् भूतकालक्रियापदानि चित्वा लिखतु।**

*श्रद्धेयौ अंशौ-* उचितस्य क्रियापदस्य चयनम्।

लकारज्ञानम्।



**कथां सम्यक् पठित्वा यावच्छक्यं प्रश्नान्  लिखतु। प्रश्नोत्तरकेलिं प्रचालयतु।**

*श्रद्धेयाः अंशाः-* आशयावगमः

प्रश्नवाचकानाम् उचितः प्रयोगः।

वाक्यघटना।

### कथां पठित्वा साभिनयं कक्ष्यायामवतारयतु।

*श्रद्धेयाः अंशाः-* आशयावगमः।
उचितं भावप्रकटनम्।
शब्दनियन्त्रणम्।

### सर्गवैचित्र्यम् अधिकृत्य कक्ष्यायां चर्चां करोतु। टिप्पणिं च लिखतु।

*श्रद्धेयाः अंशाः-* संक्षिप्तता।
विषयावबोधः।
उचिता वाक्यघटना।

### . अधोनिर्दिष्टेषु इष्टतमं विषयमधिकृत्य कथां रचयतु-

स्नेहः, दया, क्षमा

*श्रद्धेयाः अंशाः* आशयपूर्णता।
कथाशैली।
उचितं शीर्षकम्।

### शब्दकोशः

| पदम् | अर्थम् | कैरली | कन्नडा | आङ्गलम् |
|---|---|---|---|---|
| अन्धः | दर्शनहीनः | അന്ധൻ | ಕುರುಡ | blind man |
| अनुचितम् | न उचितम् | ഉചിതമല്ലാത്തത് | ಅನುಚಿತ | not suitable |
| अलाबुलता | अलाबुसस्यस्य लता | മത്തൻ വള്ളി | ಚೀನಿಕಾಯಿ ಬಳ್ಳಿ | pumkin plant |
| अरण्यम् | वनम् | കാട് | ಕಾಡು | forest |

| | | | | |
|---|---|---|---|---|
| जगत्कल्याणम् | लोकमङ्गलम् | ലോക മംഗളം | ಭೂಮಿಯ ಅಭಿವೃದ್ಧಿಯನ್ನು | welfare of the universe |
| दृष्टान्ताः | उदाहरणानि | ഉദാഹരണങ്ങൾ | ಉದಾಹರಣೆಗಳು | examples |
| पङ्गुः | विकलपादः | മുടന്തൻ | ಕುಂಟ | lame |
| पुलाकः | भक्तसिक्थकम् | വറ്റ് | ಅನ್ನದ ಅಗುಳು | rice |
| मण्डूकः | भेकः | തവള | ಕಪ್ಪೆ | frog |
| युक्तिः | उपायः | ഉപായം | ಉಪಾಯ | idea |
| विदीर्णम् | भग्नम् | പൊട്ടിയത് | ಒಡೆದ,ಮುರಿದ | broken |
| विश्वम् | भुवनम् | ലോകം | ಪ್ರಪಂಚ | world |
| सानन्दम् | सन्तोषेण | സന്തോഷത്തോടെ | ಸಂತೋಷದಿಂದ | happily |

## किमधिगतम्

निर्देशः- प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√)क्रियताम्

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेश निर्देशः | परिहारबोधनम्* (संख्यया सूचितम्) |
|---|---|---|---|---|---|
| १. | वाक्यानि पठित्वा न्यायाः विवेचिताः। | | | | |
| २. | लौकिकन्यायाः (अवरतः पञ्च) सञ्चिताः। | | | | |
| ३. | कथा साभिनयम् अवतारिता। | | | | |
| ४. | प्रदत्तविषयमधिकृत्य कथा लिखिता। | | | | |

*
१. अध्यापकस्य साहाय्येन। २. सुहृदः साहाय्येन। ३. अन्येषां साहाय्येन।

**एककम्-४**



# शीलवृत्तम्

महतां जीवनचरितानि सुभाषितानि च साधूनां मार्गदर्शकानि भवन्ति। हरिश्चन्द्रस्य कथाश्रवणेन गान्धिमहाशयस्य मनसि सद्गुणाः उत्पादिताः खलु! किमुत उपदेशपराणां सुभाषितानां श्रवणेन। एककमिदं पठतु , उपदेशान् अवगच्छतु।

**पठनाधिगमाः**

* सुभाषितानाम् आशयं वदति लिखति च।
* विषयानुसारं सुभाषितानि समाहरति।
* सुभाषितात् आप्तवाक्यानि सञ्चिनोति।
* सन्दर्भानुसारं सुभाषितं प्रयुङ्क्ते।
* सूचनानुसारं महात्मनां जीवनचरितं लिखति।
* महात्मनां योगदानमधिकृत्य वदति लिखति।

## दशमः पाठः

# प्रकृतिसिद्धमिदं हि महात्मनाम्

**दानेन भूतानि वशीभवन्ति**
**दानेन वैराण्यपि यान्ति नाशम्।**
**परोऽपि बन्धुत्वमुपैति दानै-**
**र्दानं हि सर्वव्यसनानि हन्ति।।**

| | | | |
|---|---|---|---|
| **पदच्छेदः** | वैराण्यपि | - | वैराणि + अपि। |
| | परोऽपि | - | परः + अपि। |
| | दानैर्दानं | - | दानैः + दानं। |
| **पदार्थः** | भूतानि | - | प्राणिनः, जीवजालानि |
| | परः | - | अन्यः |
| | वैराणि | - | शत्रुभावं |
| | यान्ति | - | गच्छन्ति |
| | उपैति | - | प्राप्नोति |
| | हन्ति | - | नाशयति। |

**अन्वयः** भूतानि दानेन वशीभवन्ति। वैराण्यपि दानेन नाशं यान्ति। परोऽपि दानेन बन्धुत्वमुपैति। दानं सर्वव्यसनानि हन्ति हि।

**आशयः-** दानकर्म सर्वजीवजालानि स्ववशं करोति। दानं शत्रुतां दूरीकरोति। दानकर्म अन्यान् अपि बान्धवान् करोति। दानं सर्वदुःखानि नाशयति।

२. **क्षमाशस्त्रं करे यस्य**
**दुर्जनः किं करिष्यति।**
**अतृणे पतितो वह्निः**
**स्वयमेवोपशाम्यति।।**

**पदच्छेदः** पतितो वह्निः - पतितः +वह्निः।
स्वयमेवोपशाम्यति - स्वयम् +एव +उपशाम्यति।

**पदार्थाः**

| | | |
|---|---|---|
| शस्त्रम् | - | आयुधम् |
| करः | - | हस्तः |
| अतृणे | - | तृणरहितदेशे |
| वह्निः | - | अग्निः |
| उपशाम्यति | - | नश्यति |

**विग्रहः**

| | | |
|---|---|---|
| क्षमाशस्त्रम् | - | क्षमा एव शस्त्रं यत् तत्। |
| अतृणे | - | न विद्यते तृणानि यत्र सः अतृणः (देशः) तस्मिन्। |

**अन्वयः-** यस्य करे क्षमाशस्त्रं (अस्ति तं) दुर्जनः किं करिष्यति? अतृणे पतितो वह्निः स्वयम् एव उपशाम्यति।

**आशयः-** यस्य हस्ते क्षमारूपम् आयुधम् अस्ति तस्य अपायं कर्तुं दुर्जनः न शक्नोति। तृणरहिते देशे पतितः अग्निः स्वयं नश्यति एव।

३.  सर्वद्रव्येषु विद्यैव
द्रव्यमाहुरनुत्तमम्।
अहार्यत्वादनर्घ्यत्वा -
दक्षयत्वाच्च सर्वदा।।

**पदच्छेदः** विद्यैव - विद्या + एव।
द्रव्यमाहुरनुत्तमम् - द्रव्यम् +आहुः + अनुत्तमम्।
अहार्यत्वादनर्घ्यत्वादक्षयत्वाच्च - अहार्यत्वात् + अनर्घ्यत्वात् + अक्षयत्वात् + च।

**पदार्थः**

| | | |
|---|---|---|
| सर्वद्रव्येषु | - | सर्वसम्पत्सु। |
| आहुः | - | वदन्ति। |
| अनुत्तमम् | - | श्रेष्ठम् |
| अनर्घ्यत्वात् | - | अमूल्यत्वात् |
| अहार्यत्वात् | - | अपहर्तुम् अयोग्यत्वात् |
| अक्षयत्वात् | - | नाशाभावात् |

**विग्रहः**

| | | |
|---|---|---|
| अनुत्तमम् | - | अविद्यमानम् उत्तमं यस्मात् तत्। |
| आहार्यत्वात् | - | हर्तुं योग्यं हार्यं, न हार्यम् अहार्यम्, अहार्यस्य भावो अहार्यत्वम् , तस्मात् । |
| अनर्घ्यत्वात् | - | अर्घमर्हतीति अर्घ्यं, न अर्घ्यम् अनर्घ्यम्, अनर्घ्यस्य भावो अनर्घ्यत्वं तस्मात्। |
| अक्षयत्वात् | - | न क्षयः अक्षयः, अक्षयस्य भावः अक्षयत्वम् तस्मात्। |

**अन्वयः** - अहार्यत्वात् अनर्घ्यत्वात् अक्षयत्वात् च द्रव्येषु (मध्ये) विद्या एव सर्वदा अनुत्तमं द्रव्यम् (इति) आहुः।

**आशयः** अपहर्तुम् अयोग्यत्वात्, अमूल्यत्वात्, नाशाभावात् च सर्वसम्पदां मध्ये विद्या एव सदा सर्वश्रेष्ठं द्रव्यम् इति (पण्डिताः) वदन्ति।

४. **सत्यं परः सदाचारः**
**सत्यं सर्वस्य जीवितम्।**
**सत्यं भगवतो रूपम्**
**सर्वं सत्ये प्रतिष्ठितम्।।**

**पदच्छेदः** भगवतो रूपम् - भगवतः + रूपम्।

**पदार्थः**

| | | |
|---|---|---|
| परः | - | श्रेष्ठः |
| सदाचारः | - | साधु आचारः |
| धर्मस्य | - | धार्मिकतायाः |
| भगवतः | - | ईश्वरस्य |
| प्रतिष्ठितम् | - | अधिष्ठितम्। |

**विग्रहः** सदाचारः - सन् चासौ आचारश्च अथवा- सतामाचारः सदाचारः।

**अन्वयः** सत्यं परः सदाचारः। सत्यं सर्वस्य जीवितं (भवति)। सत्यं भगवतः रूपं (भवति)। सत्ये सर्वं प्रतिष्ठितम् (अस्ति)।

**आशयः** सज्जनानां श्रेष्ठः आचारोऽस्ति सत्यम्। सत्यं धार्मिकतायाः जीवनं वर्तते। सत्यम् ईश्वरस्वरूपं भवति। सर्वमपि कार्यं सत्याधिष्ठितं भवति।

५. **विपदि धैर्यमथाभ्युदये क्षमा**
**सदसि वाक्पटुता युधि विक्रमः।**
**यशसि चाभिरुचिर्व्यसनं श्रुतौ**
**प्रकृतिसिद्धमिदं हि महात्मनाम्।।**

**पदच्छेदः**

| | | |
|---|---|---|
| धैर्यमथाभ्युदये | - | धैर्यम् +अथ +अभ्युदये। |
| चाभिरुचिर्व्यसनम् | - | च +अभिरुचिः +व्यसनम्। |
| प्रकृतिसिद्धमिदम् | - | प्रकृतिसिद्धम् +इदम्। |

**पदार्थः**

| | | |
|---|---|---|
| विपदि | - | आपदि |
| अभ्युदये | - | औन्नत्ये |
| सदसि | - | सभायाम् |
| वाक्पटुता | - | वाक्सामर्थ्यम् |
| युधि | - | युद्धे |
| विक्रमः | - | पराक्रमः |
| यशसि | - | कीर्तौ |
| अभिरुचिः | - | तात्पर्यम् |
| व्यसनम् | - | अत्यन्तासक्तिः |
| श्रुतौ | - | वेदशास्त्रे |
| प्रकृतिसिद्धं | - | स्वभावसिद्धम्। |

**विग्रहः**

| | | |
|---|---|---|
| वाक्पटुता | - | वचसि पटुता। |
| प्रकृतिसिद्धम् | - | प्रकृत्या सिद्धम्। |
| महात्मनाम् | - | महान् आत्मा यस्य सः महात्मा, तेषाम्। |

**अन्वयः** विपदि धैर्यम् अभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः यशसि अभिरुचिः अथ श्रुतौ व्यसनं च, इदं (सर्वं) महात्मनां प्रकृतिसिद्धं हि (भवति)।

**आशयः** - आपत्काले धीरता, औन्नत्ये क्षमा, सज्जनसभायां वाक्सामर्थ्यं, युद्धेषु पराक्रमः, कीर्तौ इच्छा, वेदशास्त्राभ्यसने तात्पर्यं च महात्मनां स्वभाव एव भवति।

# पठनप्रवर्तनानि



**सुभाषितानि सतालम् आलपतु।**

*श्रद्धेयाः अंशाः* - अक्षरस्फुटता।
आशयव्यक्तता।
उचितः तालः।



**सुभाषितानाम् आशयं स्ववाक्यैः लिखतु।**

*श्रद्धेयौ अंशौ-* आशयपूर्णता।
वाक्यघटना।



**अधोदत्तान् विषयानधिकृत्य सुभाषितानि सञ्चिनोतु। सम्पुटं रचयतु।**

इतरधर्मग्रन्थेषु विद्यमानानि सूक्तानि च योजनीयानि।

**विद्या, सज्जनः, क्षमा, दानं**

*श्रद्धेयाः अंशाः-* आशयपूर्णता।
विषयावबोधः।
उचितं क्रमीकरणम्।

एकादशः पाठः

# केरलकालिदासः



कैरल्यां प्रथमतया अभिज्ञानशाकुन्तलस्य विवर्तनं कृत्वा 'केरलकालिदासः' इति प्रसिद्धिं प्राप्तवान् केरलवर्मवलियकोयित्तम्पुरान् । महाभागोऽयं विविधासु भाषासु अतीव निष्णातोऽभवत्। कैरल्यां संस्कृते च विविधान् ग्रन्थान् विलिख्य स भाषायाः पोषणम् अकरोत्

च । कैरल्यां गद्यशाखायाः विकासाय सः प्रायतत। 'कविसार्वभौमः' इत्यपि प्रसिद्धस्य अस्य संस्कृतकाव्येषु विशाखविजयं महाकाव्यम् , क्षमापणसहस्रम् , यमप्रणामशतकम्, श्रीपद्मनाभपदपद्मशतकञ्च नितरां प्रसिद्धानि।

मणिप्रवालरीतिम् अवलम्ब्य तेन विरचितं सन्देशकाव्यं भवति मयूरसन्देशम्। काव्ये अस्मिन् स्वस्य जीवनस्य परमप्रधानः कश्चिदंशः प्रतिपाद्यते। आयिल्यं तिरुनाल् महाराजस्य अप्रियत्वात् तिरुवितांकूर् राजभवनात् केरलवर्मदेवः निष्कासितोऽभवत्। स हरिप्पाट्देशे कस्मिंश्चित् राजभवने कारागारे बद्धः अवसत् । तदा सः महाकविः मयूरमेकं स्वप्रियतमायाः समीपं सन्देशहरत्वेन भावनया प्रेषितवान्। एतदेव अस्य सन्देशकाव्यस्य प्रतिपाद्यो विषयः। मार्गवर्णनावसरे केरलस्य विविधान् देशान् मनोहारितया काव्येऽस्मिन् वर्णयति।

चिरं भाषापोषिणीसभायाः अध्यक्षस्थानम् अलंकुर्वन् सः न केवलं भाषाविषयेषु किन्तु मृगयाविनोदे, अश्वधावने, चतुरङ्गे च समर्थः आसीत्। इदं प्रथमतया अनन्तपुरे स महाशयः क्रिक्कट् क्लब् स्थापितवान्। क्रिस्त्वब्दे चत्वारिंशदुत्तराष्टशताधिकसहस्रतमे (१८४०) वर्षे चङ्ङनाशेरी लक्ष्मीपुरे राजभवने लब्धजन्मा अयं चतुर्दशोत्तरनवशताधिकसहस्रतमे (१९१४) वर्षे दिवंगतोऽभूत्।


**पदच्छेदः-**

| | | |
|---|---|---|
| महाभागोऽयं | - | महाभागः + अयम्। |
| इत्यपि | - | इति + अपि। |

**विग्रहवाक्यानि**

| | | |
|---|---|---|
| कविसार्वभौमः | - | कविषु सार्वभौमः। |
| सन्देशहरत्वेन | - | सन्देशं हरति इति सन्देशहरः तस्य भावः सन्देशहरत्वं , तेन। |

## पठनप्रवर्तनानि



### पाठभागं पठित्वा प्रश्नोत्तरकेलिं चालयतु।

*श्रद्धेयाः - अंशाः*  उचितं प्रश्ननिर्माणम्।
उचिता वाक्यघटना।
आशयपूर्णता।



### सूचनानुसारं श्रीनारायणगुरुदेवस्य जीवनचरित्रं लिखतु।

सूचनाः-

| | | |
|---|---|---|
| नाम | - | श्रीनारायणगुरुदेवः। |
| जननम् | - | १८५४, चेम्पष़न्ति ग्रामे। |
| पितरौ | - | माडनाशान्  कुट्टियम्मा च। |
| सन्देशः | - | एका जातिः, एको धर्मः, एको देवः मनुष्यस्य। |
| पाण्डित्यम् | - | संस्कृतम्, मलयालम्, तमिल्। |
| समाधिः | - | १९२८. शिवगिरौ। |

*श्रद्धेयाः अंशाः-*  उचितः भाषाप्रयोगः।
आशयपूर्णता।
आशयक्रमीकरणम्।



### अधोदत्तानि वर्षाणि उदाहरणानुसारम् अक्षरैः लिखतु।

उदा - १९४८ - अष्टचत्वारिंशदधिकनवशताधिकसहस्रम्।

१८४६, २००२, २००८, २०१४.



**संस्कृतसाहित्ये केरलकालिदासस्य योगदानमधिकृत्य लघूपन्यासं लिखत।**

*श्रद्धेयाः अंशाः-* आशयक्रमीकरणम्।
आशयव्यक्तता।
वाक्यघटना।



**केरलकालिदासेन विरचितानां कृतीनां संस्कृतकृतयः ,अनूदितकृतयः, भाषाकृतयः इति क्रमेण पट्टिकां करोतु।**

*श्रद्धेयौ अंशौ -* समाहरणणम्।
क्रमीकरणम्।



**उदाहरणानुसारं वाक्यानि परिवर्त्य लिखतु।**

न केवलं .......... किन्तु।

उदा- १. नेहरु महोदयः न केवलं राष्ट्रतन्त्रज्ञः किन्तु साहित्यकारः चासीत्।
२. सुगतकुमारी न केवलं कवयित्री किन्तु परिस्थितिप्रवर्तिका च भवति।

१. कालिदासः ....... नाटककर्ता ...... महाकविः चासीत्।
२. मासिक्यां ....... कविताः ...........कथादयश्च सन्ति।
३. भेकः ......स्थले ............जले च वसति।
४. कानने ...............मृगाः ...............पक्षिणः च सन्ति।
५. आकाशे ..............ग्रहाः .........नक्षत्राणि च विद्यन्ते।

# शब्दकोशः

| पदम् | संस्कृतम् | मलयालम् | कन्नटा | आङ्गलम् |
|---|---|---|---|---|
| अतृणे | तृणरहितदेशे | പുല്ലില്ലാത്തിടത്ത് | ಹುಲ್ಲಿಲ್ಲದಜಾಗದಲ್ಲಿ | without grass |
| अक्षयत्वात् | नाशाभावात् | നശിക്കാത്തതു കൊണ്ട് | ನಾಶವಿಲ್ಲದ | due to imperishability |
| अभिरुचिः | तात्पर्यम् | താല്പര്യം | ಆಸಕ್ತಿ | aptitude |
| अभ्युदये | औन्नत्ये | ഉയർച്ചയിൽ | ಅಭ್ಯುದಯದಲ್ಲಿ | inprosperity |
| अनर्घ्यत्वात् | हर्तुम् अशक्यत्वात् | അമൂല്യമായതിനാൽ | ಅಪಹರಿಸಲು ಸಾಧ್ಯವಿಲ್ಲದುದರಿಂದ | due to preciouness |
| उपशाम्यति | नश्यति | നശിക്കുന്നു | ಶಮನಗೊಳ್ಳುತ್ತದೆ | destroyed |
| उपैति | प्राप्नोति | പ്രാപിക്കുന്നു | ಹೊಂದುತ್ತಾನೆ | attain |
| करः | हस्तः | കൈ | ಕೈ | hand |
| कारागारः | कारागृहम् | തടവറ | ಸೆರೆಮನೆ | Jail |
| दिवंगतः | यशःशरीरः | പരേതൻ | ನಿಧನನಾದವನು | deceased |
| धर्मस्य | धार्मिकतायाः | ധാർമികതയുടെ | ಧರ್ಮದ | connected to duty |
| निष्कासितः | बहिष्कृतः | പുറത്താക്കപ്പെട്ടവൻ | ಬಹಿಷ್ಕರಿಸಲ್ಪಟ್ಟವನು | ousted |
| निष्णातः | पण्डितः | പണ്ഡിതൻ | ನಿಪುಣನು | scholar |
| परः | श्रेष्ठः | ശ്രേഷ്ഠൻ | ಶ್ರೇಷ್ಠ | noble |
| परः | अन्यः | അന്യൻ | ಬೇರೆಯವನು | another |
| प्रकृतिसिद्धम् | स्वाभाविकतया सिद्धम् | അധിഷ്ഠിതമായത് | ಪ್ರಕೃತಿದತ್ತವಾದ | inbuilt |
| भगवतः | ईश्वरस्य | ഈശ്വരന്റെ | ಭಗವಂತನ | of God |
| भूतानि | जीवजालानि | ജീവജാലങ്ങൾ | ಜೀವಿಗಳು | creatures |

| | | | | |
|---|---|---|---|---|
| मणिप्रवालम् | कैरलीसंस्कृतयोगः | മലയാളവും സംസ്കൃതവും കലർന്നത് | ಮಣಿಪ್ರವಾಲ ವೆಂಬ ಭಾಷಾಶೈಲಿ | blend of Malayalam and Sanskrit |
| मृगया | आखेटः | നായാട്ട് | ಬೇಟೆ | hunting |
| यशसि | कीर्त्तौ | കീർത്തിയിൽ | ಯಶಸ್ಸಿನಲ್ಲಿ | in fame |
| यान्ति | गच्छन्ति | പോകുന്നു | ಹೊಂದುತ್ತಾರೆ | goes |
| युधि | युद्धे | യുദ്ധത്തിൽ | ಯುದ್ಧದಲ್ಲಿ | in the war |
| वह्निः | अग्निः | തീ | ಬೆಂಕಿ | fire |
| शस्त्रम् | आयुधम् | ആയുധം | ಆಯುಧ | weapon |
| वाक्पटुता | वाक्सामर्थ्यम् | വാക്സാമർത്ഥ്യം | ಮಾತುಗಾರಿಕೆ | oratory skill |
| विक्रमः | पराक्रमः | പരാക്രമം | ಪರಾಕ್ರಮ | valiance |
| विवर्तनम् | भाषान्तरीकरणम् | തർജ്ജമ | ಅನುವಾದ | translation |
| विपदि | आपदि | ആപത്തിൽ | ಆಪತ್ತಿನಲ್ಲಿ | in danger |
| वैराणि | शत्रुता | ശത്രുത | ಶತ್ರುತ್ವ | enmity |
| आसक्तिः | व्यसनम् | ആസക്തി | ಆಸಕ್ತಿ | desire |
| श्रुतौ | वेदशास्त्रे | വേദശാസ്ത്രത്തിൽ | ಶ್ರುತಿಯಲ್ಲಿ | in vedas |
| सदसि | सभायाम् | സഭയിൽ | ಸಭೆಯಲ್ಲಿ | in the royal court |
| सदाचारः | सज्जनानाम् आचारः | സജ്ജനങ്ങളുടെ അനുഷ്ഠാനം | ಸದಾಚಾರ | activities of the good people |
| सन्देशहरः | सन्देशवाहकः | ദൂതൻ | ದೂತ | messenger |
| सर्वद्रव्येषु | सर्वसम्पत्सु | എല്ലാദ്രവ്യങ്ങളിലും | ಎಲ್ಲಾ ಸಂಪತ್ತುಗಳಲ್ಲಿ | in all of the wealth |
| सार्वभौमः | चक्रवर्ती | ചക്രവർത്തി | ಚಕ್ರವರ್ತಿ | king of the kings |
| हन्ति | नाशयति | നശിപ്പിക്കുന്നു | ಕೊಲ್ಲುತ್ತಾನೆ | destroys |

# किमधिगतम्

निर्देशः- प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√)क्रियताम्

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेश निर्देशः | परिहारबोधनम्* (संख्यया सूचितम्) |
|---|---|---|---|---|---|
| १. | सुभाषितानाम् आशयः लिखितः। | | | | |
| २. | सुभाषितानां सम्पुटं रचितम्। | | | | |
| ३. | केरलकालिदासस्य योगदानमधिकृत्य लघूपन्यासः लिखितः। | | | | |
| ४. | कृतीनां पट्टिका कृता। | | | | |
| ५. | उदाहरणानुसारं वाक्यानि लिखितानि। | | | | |

*
१. अध्यापकस्य साहाय्येन। २. सुहृदः साहाय्येन। ३. अन्येषां साहाय्येन।